CC-0. In Public Domain. Digitization by eGangotri

संस्कृत-भाषा-शिक्षणाय

संस्कृतशिक्षणाभ्यासः

द्वितीयो भागः

नीलमणिढुङ्गाना

महेन्द्र-संस्कृत-विश्वविद्यालयः
बेलझुण्डी, दाङ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सा·2032R·

संस्कृतशिक्षणाभ्यासः

द्वितीयो भागः

R

सम्पादक :
नीलमणिढुङ्गाना

प्रकाशकः
महेन्द्रसंस्कृतविश्वविद्यालयः
बेल्झुण्डी, दाङ्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

☒ **प्रकाशक :**
महेन्द्रसंस्कृतविश्वविद्यालय :
बेल्झुण्डी, दाङ् ।

☒ **संपादक :** नीलमणिढुङ्गाना
☒ **संस्करणम् :** प्रथमम् २०५३
☒ **प्रकाशितप्रति** १०००

☒ **मूल्यम् रू.** ५०/-

☒ **कम्प्युटर :** स्क्रिप्टप्रो सर्भिस, बागबजार, काठमाडौं ।
फोन : २२७८७० ।

☒ **मुद्रक**
लिखु प्रिन्टर्स
माइतीघर, काठमाडौं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सा. २०३२R.

प्रकाशकीयम्

अनधीतसंस्कृतवाङ्मयानां तदध्येतुकामानां छात्राणां संस्कृतभाषायाः प्रशिक्षणाय महेन्द्रसंस्कृतविश्वविद्यालयेन कार्यक्रमोऽस्ति सञ्चालितः । कार्यक्रमस्यास्य पाठ्यक्रमे साहित्यविषये विष्णुशर्मणा प्रणीतस्य हितोपदेशस्य, भर्तृहरिविरचितस्य नीतिशतकस्य, महाभारतान्तर्गताया विदुरनीतेश्च केचनोंऽशाः कानिचित् छन्दांसि च सन्ति निर्धारितानि । परं तेषां सङ्कलनस्याभावेन छात्राणामध्ययनस्याध्यापनस्य च काठिन्यमनुभूतमासीत्, तन्निराकरणाय तेषामेव ग्रन्थेभ्यो निर्धारितभागान् संगृह्य भाषाशिक्षणपद्धत्या संपादितेयं कृतिः संस्कृतभाषां प्रयोक्तुकामानां तदध्येतृणाञ्च नूनमेवोपयोगिनी भवेदिति विश्वासः । सहप्राध्यापकेन नीलमणिढुङ्गानामहोदयेन संस्कृतभाषाशिक्षणाभ्यासस्य भागद्वयं निर्माय कार्यमेतद् यद् विहितं तस्य कृते तस्मै साधुवादमर्पयति

– माधवराजगौतमः
शिक्षाध्यक्षः

दिनाङ्कः :
२०५३।३।२९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विषय-सूची

१. एकविंशतितमः पाठः
  १. निशान्ते प्रबुद्धस्य व्याधं विलोकयतो वायसस्य चिन्ता, १ - ४
  २. तदनुसरणञ्च
  ३. क्त्वाप्रत्ययान्तपदानां विशेषेण प्रयोगाभ्यासः

२. द्वाविंशतितमः पाठः ५ - ९
  १. चित्रग्रीवेण तण्डुलकणानामवलोकनम्,
  २. तद् दृष्टवा कपोतान् प्रति चित्रग्रीवस्योपदेशः
  ३. विशेषेण क्त्वाप्रत्ययान्तपदप्रयोगाभ्यासः

३. त्रयोविंशतितमः पाठः १० - १२
  १. व्याघ्रवचनं निशम्य पान्थस्य सुवर्णकङ्कणलोभः
  २. विशेषेण ल्यवन्तपदप्रयोगाभ्यासः

४. चतुर्विंशतितमः पाठः १३ - १५
  १. व्याघ्रपथिकयोः सम्वादः
  २. विशेषेण शतृप्रत्ययान्तपदप्रयोगाभ्यासः

५. पञ्चविंशतितमः पाठः १६ - २०
  १. व्याघ्रवचनमनुसृत्य स्नानाय जलाशयं प्रविशतः पान्थस्य निधनम्
  २. विशेषेण तुमुन्प्रत्ययान्तपदप्रयोगाभ्यासः

६. षड्विंशतितमः पाठः २१ - २५
  १. कपोतानां जालबन्धनम्,
  २. तत्प्रतीकारोपायं विचिन्त्य जालमादायोत्पतनञ्च
  ३. विशेषेण तव्यत्प्रत्ययान्तपदप्रयोगाभ्यासः

७. सप्तविंशतितमः पाठः २६ - ३०
  १. कपोतेष्वदृष्टेषु लुब्धकस्य निवृत्तिः,
  २. पाशच्छेदाय कपोतानां हिरण्यकविवरप्राप्तिः
  ३. मित्रवचनं निशम्य हिरण्यकस्य हर्षाभिव्यक्तिः
  ४. विशेषतोऽनीयर्प्रत्ययान्तपदप्रयोगाभ्यासः

८. अष्टाविंशतितमः पाठः ३१ - ३४
  १. हिरण्यकचित्रग्रीवयोः संवादः
  २. सकपोतस्य चित्रग्रीवस्य पाशमुक्तिः
  ३. आतिथ्यं स्वीकृत्य हिरण्यकेन विसृष्टस्य सपरिवारस्य चित्रग्रीवस्य यथेष्टदेशगमनम्
  ४. हिरण्यकस्य स्वविवरप्रवेशश्च,
  ५. विशेषण शानच्प्रत्ययान्तपदप्रयोगाभ्यासः,

९. एकोनत्रिंशत्तमः पाठः ३५ - ३७
  १. हिरण्यकलघुपतनकयोः संवादः
  २. विशेषेण विशेषणपदप्रयोगाभ्यासः

१०. त्रिंशत्तमः पाठः ३८ - ४१
  १. चम्पकवत्यां मृगं विलोक्य तद्भक्षणाय शृगालेन विश्वासस्योत्पादनम्
  २. रात्रौ तयोर्निवासस्थलगमनम्
  ३. मृगमित्रेण काकेन सह जम्बुकस्यालापः
  ४. शृगालस्य मित्रत्वं सहावस्थितिं च स्वीकर्तुं, काकं प्रति मृगस्याग्रहः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri
सा.२०३२२

५. अतिशयार्थबोधकविशेषणपदप्रयोगाभ्यासः
११. एकत्रिंशत्तमः पाठः ४२ - ४४
१. शृगालनिर्देशितपथा प्रत्यहं सस्यं खादतो मृगस्य क्षेत्रपतियोजितपाशवन्धनम्, तच्चिन्ता च
२. तद् दृष्ट्वा जम्बुकस्य हर्षातिरेकः
३. शृगालं विलोक्य बन्धनच्छेदनाय मृगस्याह्वानम्
४. एकतो त्रिंशत्पर्यन्तानां सङ्ख्यावाचकपदानां प्रयोगस्तदभ्यासश्च,
१२. द्वात्रिंशत्तमः पाठः ४५-४७
१. अलीकाश्वासनेन शृगालस्य प्रच्छन्नावस्थितिः
२. इतस्ततो मृगमन्विषता काकेन प्रातस्तस्यावलोकनम्
३. मृगेण स्ववृतान्तनिवेदनम्
४. आयान्तं क्षेत्रपतिं विलोक्य काकेन पाशमुक्तेरुपायप्रदर्शनम्
५. काकवचनमनुसरतो मृगस्य पाशमुक्तिः, क्षेत्रपतिप्रक्षिप्तलगुडेन शृगालवधश्च,
६. एकत्रिंशदादिषष्ट्यन्तसंख्यावाचकपदानां प्रयोगस्तदभ्यासश्च,
१३. त्रयस्त्रिंशत्तमः पाठः ४७-५०
१. पर्कटीवृक्षसविधे दीर्घकर्णस्यागमनम्, जरद्गवस्य विश्वासोत्पादनं, तत्रैवावस्थानञ्च
२. एकषष्टितः सप्ततिपर्यन्तानां सङ्ख्यावाचकपदानां प्रयोगस्तदभ्यासश्च
१४. चतुस्त्रिंशत्तमः पाठः ५१-५३
१. दीर्घकर्णेन पक्षिशावकानां भक्षणम्
२. पक्षिणां विलापः, शावकास्थिनां दर्शनम्
३. गृध्रमेव शावकघातिनं मत्वा तद्वधश्च
४. एकसप्ततितो दशशङ्खपर्यन्तानां सङ्ख्यावाचकपदानां प्रयोगस्तदभ्यासश्च
१५. पञ्चत्रिंशत्तमः पाठः ५४-५६
१. चूडाकर्णवीणाकर्णकथा
२. प्रथमद्वितीयादिविशेषणपदानां प्रयोगस्तदभ्यासश्च
१६. षट्त्रिंशत्तमः पाठः ५७-५९
१. भैरवदीर्घरावकथा
२. अकस्मात्प्रभृतीनां क्रियाविशेषणपदानां प्रयोगस्तदभ्यासश्च
१७. सप्तत्रिंशत्तमः पाठः ६० - ६३
१. वृद्धशृगालकर्पूरतिलकहस्तिकथा
२. शश्वत्प्रभृतीनां क्रियाविशेषणपदानां प्रयोगस्तदभ्यासश्च,
१८. अष्टत्रिंशत्तमः पाठः ६४ - ६६
१. गद्यपद्ययोः लक्षणे, तत्प्रकाराश्च
२. छन्दोनियमाः
१९. एकोनचत्वारिंशत्तमः पाठः ६७ - ६८
१. अर्यालक्षणम्
२. नीतिपद्यान्तर्गतानि तदुदाहरणानि च
२०. चत्वारिंशत्तमः पाठः ६९ - ७१
१. अनुष्टुब्वृत्तस्य लक्षणम्, तदुदाहरणानि च
२. नीतिपद्यानि (चाणक्यनीत्यन्तर्गतानि)
३. सनन्तपदप्रयोगः
२१. एकचत्वारिंशत्तमः पाठः ७२ - ७४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

१. नीतिपद्यानि (हितोपदेशकथामुखान्तर्गतानि)
२२. द्विचत्वारिंशत्तमः पाठः ७५ - ७७
१. नीतिपद्यानि (हितोपदेशान्तर्गतानि)
२. उपसृष्टानां क्रियापदानां प्रयोगः
२३. त्रिचत्वारिंशत्तमः पाठः ७८ - ८०
१. नीतिपद्यानि (हितोपदेशान्तर्गतानि)
२. उपसृष्टानां क्रियापदानां प्रयोगः
२४. चतुश्चत्वारिंशत्तमः पाठः ८१ - ८३
१. नीतिपद्यानि (विदुरनीत्यन्तर्गतानि)
२५. पञ्चचत्वारिंशत्तमः पाठः ८४ - ८८
१. इन्द्रवज्राया लक्षणम्, तदुदाहरणानि च
२. उपेन्द्रवज्राया लक्षणम्, तदुदाहरणानि च
३. उपजातेर्लक्षणम्, तदुदाहरणानि च
४. उपसृष्टानां क्रियापदानां प्रयोगस्तदभ्यासश्च
२६. षट्चत्वारिंशत्तमः पाठः ८९ - ९१
१. वंशस्थस्य लक्षणम्, तदुदाहरणानि च
२. नीतिपद्यानि
३. अत्रतत्रादीनां त्रियाविशेषणपदानां प्रयोगस्तदभ्यासश्च
२७. सप्तचत्वारिंशत्तमः पाठः ९२ - ९३
१. वसन्ततिलकवृत्तस्य लक्षणम्, तदुदाहरणानि च
२ नीतिपद्यानि
२८. अष्टचत्वारिंशत्तमः पाठः ९४ - ९६
१. मालिनी छन्दसो लक्षणम्, तदुदाहरणानि च
२. नीतिपद्यानि
२९. एकोनपञ्चाशत्तमः पाठः ९७ - ९८
१ मन्दाक्रान्ताछन्दसो लक्षणम्, तदुदाहरणानि च
२. नीतिपद्यानि
३०. पञ्चाशत्तमः पाठः ९९ - १००
१. शिखरिणीवृत्तस्य लक्षणम्, तदुदाहरणानि च
२. नीतिपद्यानि
३१. एकपञ्चाशत्तमः पाठः १०१ - १०२
१. शार्दूलविक्रीडितछन्दसो लक्षणम्, तदुदाहरणानि च
२. नीतिपद्यानि
३२. द्विपञ्चाशत्तमः पाठः १०३ - १०४
१. स्रग्धराछन्दसो लक्षणम्, तदुदाहरणञ्च।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एकविंशतितमः पाठः

२१.१ निम्नलिखितगद्यभागमधीत्य तदनुवर्तिनां प्रश्नानामुत्तराणि लिखत ।

अस्ति गोदावरीतीरे विशालः शाल्मलीतरुः । तत्र नानादिग्देशादागत्य रात्रौ पक्षिणो निवसन्ति । अथ कदाचिदवसन्नायां रात्रावस्ताचलचूडावलम्बिनि भगवति कुमुदिनीनायके चन्द्रमसि लघुपतनकनामा वायसः प्रबुद्धः कृतान्तमिव द्वितीयमायान्तं व्याधमपश्यत् । तमवलोक्याचिन्तयत्- "अद्य प्रातरेवानिष्टदर्शनञ्जातम् । न जाने, किमनभिमतं दर्शयिष्यति ।" इत्युक्त्वा तदनुसरणक्रमेण चलितः ।

१ शाल्मलीतरुः कुत्र वर्तते ?

२ पक्षिणः कुत्र निवसन्ति ?

३ पक्षिणः कुतः समागताः सन्ति ?

४ वायसः कदा प्रवुद्धः ?

५ कुमुदिनीनायकः कोऽस्ति ?

६ वायसस्य नाम किं वंर्तते ?

७ अवसन्नायां रात्रौ चन्द्रः किमकरोत् ?

८ काकः कीदृशं व्याधमपश्यत् ?

९ व्याधं विलोक्य काकः किमचिन्तयत् ?

१० वायसः कमनुसृत्य चलितवान् ?

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

२१.२ पर्यायशब्दान् लिखत ।

गोदावरीतीरे । विशालः । तरुः । रात्रौ । आगत्य । पक्षिणः । निवसन्ति । कदाचित् । अद्य । चन्द्रः । काकः । प्रबुद्धः । अथ । दर्शयिष्यति । उक्त्वा । चलितः।

२१.३. विग्रहान् प्रदर्श्य समासनामानि च लिखत ।

गोदावरीतीरे । नानादिग्देशात् । अस्ताचलचूडावलम्बिनि । कुमुदिनीनायके । लघुपतनकनामा । अनिष्टदर्शनम् । अनभिमतम् । तदनुसरणक्रमेण ।

२१.४ सन्धिविच्छेदं कुरुत ।

इत्युक्त्वा । देशादागत्य । पक्षिणो निवसन्ति । रात्रावस्ताचलचूडावलम्विनि । दर्शनञ्जातम् । अवलोक्याचिन्तयत् । कदाचिदवसन्नायाम् ।

२१.५. प्रकृतिप्रत्ययविच्छेदं कुरुत ।

आगत्य । दर्शनम् । अवसन्ना । अनुसरणम् । कृतः । अवलोक्य । प्रबुद्धः । द्वितीयः । जातः । नायकः । पक्षी ।

२१.६. वाक्येषु प्रयोगं कुरुत ।

रात्रौ । आगत्य । अवलोक्य । प्रबुद्धः । अद्य । व्याकुलः । अचिन्तयत् । उक्त्वा । अपश्यत् । दर्शयिष्यति । निवसन्ति । द्वितीयः । कदाचित् । अस्ति ।

२१.७ वाक्यसंश्लेषणं कुरुत ।

१. गोदावरीतीरे तरुः, अस्ति । तस्य नाम शाल्मली वर्तते । तत्र पक्षिणो निवसन्ति । ते दिग्देशादागताः सन्ति ।

२. वायसः प्रबुद्धः । तस्य नाम लधुपतनक आसीत् । स व्याधमपश्यत् । व्याधः कृतान्त इवासीत् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

३. काकश्चलितः । स चं व्याकुल आसीत् । सोऽनिष्टस्य शङ्कामकरोत् । स चिन्तितोऽभवत् ।

२१.८ निर्धारितगद्यभागस्य सरलार्थं लिखत ।

२१.९ परस्परं मेलयत ।

(क)	(ख)
१. तरुः	(क) निवसन्ति
२. पक्षिणः	(ख) उक्त्वा
३. इति	(ग) अस्ति
४. चन्द्रः	(घ) अचलत्
५. वायसः	(ङ) अस्तङ्गतः ।

२१.१० कोष्ठस्थपदान्यनुसृत्य रिक्तस्थानानि पूरयत ।

१. शाल्मलीतरवः .... सन्ति (गोदावरीतट) ।

२. पक्षिणः ....रात्रौ निवसन्ति (देश,आगम्) ।

३. कदाचित्.........रात्रौ वायसः प्रबुद्धः (अव-सद्) ।

४. वायसः ....व्याधमपश्यत् (आ-या) ।

५. लघुपतनकः .... अवलोक्याचिन्तयत् (तत्) ।

६. व्याधो द्वितीय आगच्छन्.......इवासीत् (कृतान्त) ।

७. नानादिग्देशादागत्य ...... खगा निवसन्ति (तरु) ।

८. अस्तङ्गते...वायसः प्रबुद्धः । (चन्द्रमस्)

९. न जाने ....दर्शयिष्यति । (किम्,अनभिमत)

२१.११ वाक्यविश्लेषणं कुरुत ।

अवसन्नायां रात्रावस्ताचलचूडावलम्बिनि कुमुदिनीनायके चन्द्रमसि लघुपतनकनामा वायसः प्रबुद्धो व्याधमपश्यत् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

२१.१२ रेखाङ्कितपदानां निर्वचनं कुरुत ।

२१.१३ विशेषणपदान्यन्विष्य लिखत ।

२१.१४ अधोलिखितपदानि प्रयुज्य वाक्यानि रचयत ।

कुपित्वा । कूजित्वा । कल्पयित्वा । क्रन्दयित्वा । क्रीत्वा । क्रीडित्वा । क्रुद्ध्वा । क्षमित्वा । क्षिप्त्वा । खादित्वा । खनित्वा । गत्वा । गणयित्वा । गुम्फित्वा । ग्रथित्वा । घ्रात्वा । चर्वयित्वा । छित्त्वा । जनित्वा । जित्वा । ताडयित्वा । दृष्ट्वा । तर्जयित्वा । त्रपित्वा । नत्वा । दुग्ध्वा ।

२१.१५ वहुवचने परिवर्तनं कुरुत ।

गोदावरीतटे विशालः शाल्मलीतरुर्वर्तते । अस्मिन् पक्षी निवसति । स च देशादागतोऽस्ति । कदाचित् तत्र पाशहस्तो व्याधः समागतः । स च पक्षी भयार्तः कोलाहलं कृतवान् ।

२१.१६ वाच्यपरिवर्तनं कुरुत ।

लघुपतनकः कृतान्तसदृशं व्याधमपश्यत् । तं विलोक्य तेनायं व्याधः पक्षिणो घातयिष्यतीति चिन्तितम् । ततः स पाशहस्तं तमेव व्याधमनुसृतवान् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

द्वाविंशतितमः पाठः

२२.१. निम्नलिखितगद्यभागमधीत्य तदनुवर्तिनां प्रश्नानामुत्तराणि लिखत ।

अथ तेन व्याधेन तण्डुलकणान् विकीर्य जालं विस्तीर्णम् । स च प्रच्छन्नो भूत्वा स्थितः । तस्मिन्नेव काले चित्रग्रीवनामा कपोतराजः सपरिवारो वियति विसर्पन् तान् तण्डुलकणानवलोकयामास । ततस्तण्डुलकणलुब्धान् कपोतान् प्रति कपोतराज आह- "कुतोऽत्र निर्जने वने तण्डुलकणानां संभवः ? तन्निरूप्यतां तावत् । भद्रमिदं न पश्यामि । प्रायेणानेन तण्डुलकणलोभेनास्माभिरपि तथा भवितव्यं यथा कङ्कणस्य लोभेन सुदुस्तरे महापङ्के निमग्नः पथिको वृद्धव्याघ्रेण घातितः खादितश्च ।

१. व्याधः किं कृत्वा जालं विस्तारितवान् ?

२ पाशान् विस्तार्य व्याधेन किं कृतम् ?

३. तदानीं चित्रग्रीवः किं कुर्वन् आसीत् ?

४. कपोतराजः किमपश्यत् ?

५ कपोताः केषु लुब्धा आसन् ?

६. चित्रग्रीवः कपोतान् किमाह ?

७ कपोतराजः कस्मिन् विषये भद्रं नापश्यत् ?

८. कङ्कणस्य लोभेन पथिकस्य का दशा सञ्जाता ?

२२.२ विग्रहान् प्रदश्र्य समासनामानि लिखत ।

तण्डुलकणान् । चित्रग्रीवनामा । कपोतराजः । सपरिवारः । तण्डुलकणलुब्धान् । तण्डुलकणलोभेन । दुस्तरे । महापङ्के । वृद्धव्याघ्रेण । निर्जने ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

२२.३. निर्धारितपाठान्तर्गतपदानां पर्यायशव्दान् लिखत ।

२२.४. सन्धिविच्छेदं कुरुत ।

तस्मिन्नेव । कपोतराज आह । कुतोऽत्र । तन्निरूप्यताम् । लोभेनास्भाभिः । प्रायेणानेन ।

२२.५. प्रकृतिप्रत्ययविच्छेदं कुरुत

विकीर्य । विस्तीर्णः । प्रच्छन्नः । भूत्वा । स्थितः । विसर्पन् । कुतः । भवितव्यम् । संभवः । लुब्धः । कपोतराजः । घातितः । खादितः ।

२२.६. वाक्येषु प्रयोगं कुरुत ।

विकीर्य । भूत्वा । ततः । सपरिवारः । आह । अत्र । प्रायेण । अस्माभिः । कुतः । यथा । स्थितः । निरूप्यताम् । भद्रम् । लोभेन । निमग्नः । घातितः । खादितः ।

२२.७. वाक्यसंश्लेषणं कुरुत ।

१. व्याधः प्रथमं तण्डुलकणान् व्यकिरत् । ततः स जालं विस्तारितवान् । तदनु व्याधः प्रच्छन्नोऽभवत् ।
२. चित्रग्रीवस्तण्डुलकणानपश्यत् । स कपोतानां राजासीत् । स सपरिवारो वियति विसर्पति स्म ।
३. चित्रग्रीवः कपोतान् प्रत्याह । ते च तण्डुलकणेषु लुब्धा आसन् । चित्रग्रीवः कपोतानां राजासीत् ।
४. चित्रग्रीवेण कथितम् । तण्डुलकणानां लोभेनास्माकं कल्याणं न भवति । कङ्कणस्य लोभेन सुदुस्तरे महापङ्के निमग्नः पथिको वृद्धव्याघ्रेण व्यापादितः ।

२२.८ निर्धारितगद्यभागस्य सरलार्थं लिखत ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

२२.९ परस्परं मेलयत ।

(क)	(ख)
१. व्याधः	(क) चित्रग्रीवः
२. वियति	(ख) संभवः
३. सपरिवारः	(ग) कङ्कणस्य
४. कुतः	(घ) प्रच्छन्नः
५. लोभेन	(ङ) विसर्पन्

२२.१०. कोष्ठस्थपदान्यनुसृत्य रिक्तस्थानानि पूरयत ।

१) पान्थः ....घातितः । (वृद्धव्याघ्र)
२) कपोताः .....लुब्धा आसन् । (तण्डुलकण) ।
३) इयं .... न पश्यामि । (भद्र)
४) पथिकः ..:........पङ्के निमग्नः । (सुदुस्तर)
५) चित्रग्रीवः .... प्रत्याह । (कपोत)
६) अनेन ...... तथा भवितव्यम् । (तण्डुलकणलोभ)
७) लुब्धकेन .... विकीर्य जालं विस्तीर्णम् । (तण्डुल)
८) कपोतराजो वियति .... तण्डुलकणान् दृष्टवान् ।
(वि-सृप्)
९) व्याधः .....प्रच्छन्नोऽभवत् । (जाल, वि-स्तृ)
१०) कुतोऽत्र....वने.......संभवः ? (निर्जन, तण्डुलकण)

२२.११ वाच्यपरिवर्तनं कुरुत ।

तेन जालं विस्तीर्णम् । कपोतराजस्तण्डुलकणानपश्यत् । तन्निरूप्यताम् । पथिको वृद्धव्याघ्रेण घातितः । व्याधस्तण्डुलकणानकिरत् । जालं विस्तार्य व्याधः प्रच्छन्नोऽभवत् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

२२.१२. वाक्येषु प्रयोगं कुरुत ।

कथम् । अकथयत् । व्याघ्रः । भाग्येन । किन्तु । सर्वत्र । केनचित् । यत्र । विकीर्य । विस्तीर्णः । स्थितः । एकदा । आलोचितम् । सर्वत्र । अत्र । विसर्पन् ।

२२.१३. निर्धारितपाठान्तर्गतानि कर्तृपदानि कर्मपदानि चान्विष्य लिखत ।

२२.१४ निम्नपदानि प्रयुज्य वाक्यानि रचयत ।

द्योतित्वा । छित्त्वा । नष्ट्वा । निन्दित्वा । नीत्वा । पठित्वा । पतित्वा । पीत्वा । पालयित्वा । पुष्पित्वा । पूरयित्वा । पृष्ट्वा । फलित्वा । बद्ध्वा । भक्षयित्वा । मत्वा । भ्रमित्वा । मण्डयित्वा । मथित्वा । मन्त्रयित्वा । मित्वा । मार्जयित्वा । मोचयित्वा । मुक्त्वा । यतित्वा । क्षिप्त्वा । लब्ध्वा । लिखित्वा । उक्त्वा । वञ्चयित्वा । श्रुत्वा । श्लाघयित्वा । सान्त्वयित्वा । सृष्ट्वा । स्तुत्वा । स्पृष्ट्वा । स्मृत्वा । हत्वा ।

२२.१५ रेखाङ्कितपदानां निर्वचनं कुरुत ।

२२.१६एकवचने परिवर्तनं कुरुत ।

१. व्याधैस्तण्डुला विकीर्णाः, जालानि च विस्तीर्णानि ।

२. तदा सचित्रग्रीवाः कपोता वियति विसर्पन्त आसन् ।

३. कपोतास्तण्डुलानां कणेषु लुब्धा अभवन् ।

४. वयं भद्राणि न पश्यामः ।

२२.१७ कमपि कथानकं प्रकल्प्य कामपि कथामेकां रचयत ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

२२.१८ भूतकाले परिवर्तनं कुरुत ।

चित्रग्रीवो वियति विसर्पति । स च सपरिवारोऽस्ति । स कपोतानां राजा वर्तते । तदा चित्रग्रीवस्तण्डुलकणान् पश्यति ।

२२.१९ वर्तमानकाले परिवर्तनं कुरुत ।

व्याधस्तण्डुलकणान् व्यकिरत् । वियति विसर्पन् सपरिवारश्चित्रग्रीवस्तान् तण्डुलकणानपश्यत् । ततः स कपोतानकथयत्- निर्जनेऽत्र वने तण्डुलकणानामुत्पत्तिः कथम् ?

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्रयोविंशतितमः पाठः

२३.१ निम्नगद्यभागमधीत्य तदनुवर्तिनां प्रश्नानामुत्तराणि लिखत ।

कपोता ऊचुः - कथमेतत् ? चित्रग्रीवोऽकथयत्- अहमेकदा दक्षिणारण्ये चरन्नपश्यम् - एको वृद्धो व्याघ्रः स्नातः कुशहस्तः सरस्तीरे ब्रूते - भो भो पान्थाः, इदं सुवर्णकङ्कणं गृह्यताम् । ततो केनचिद् लोभाकृष्टेन पान्थेनालोचितम् । भाग्येनैतत्संभवति किन्त्वत्रात्मसन्देहे प्रवत्तिर्न विधेया । यतोऽनिष्टादिष्टलाभेऽपि शुभा गतिर्न जायते । यत्र विषसंसर्गं तदमृतमपि मृत्यवे भवति किन्तु सर्वत्र प्रायेणार्थार्जनप्रवृत्तौ सन्देह एव ।

१ चित्रग्रीवः कुत्र भ्रमन्नासीत् ।

२ व्याघ्रः कीदृशः ?

३ व्याघ्रस्य वचनं निशम्य पान्थेन किं विचारितम् ?

४ कुत्र प्रवृत्तिर्न विधेया ?

५. कस्मिन् शुभा गतिर्न भवति ?

६. पान्थः कीदृश आसीत् ?

७. प्रायेण कस्मिन् विषये सन्देह एव भवति ?

२३.२ विग्रहान् प्रदर्श्य समासनामानि लिखत ।

चित्रग्रीवः । दक्षिणारण्ये । कुशहस्तः । सरस्तीरे । सुवर्णकङ्कणम् । लोभाकृष्टेन । आत्मसन्देहे । अनिष्टात् । इष्टलाभे । विषसंसर्गम् । अर्थार्जनप्रवृत्तौ ।

२३.३ सन्धिविच्छेदं कुरुत ।

कपोता ऊचुः । चित्रग्रीवोऽकथयत् । चरन्नपश्यम् । पान्थेनालोचितम् । भाग्येनैतत् । किन्त्वत्र । अत्रात्मसन्देहे ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अनिष्टादिष्टलाभे । लाभेऽपि । सर्वत्रार्थार्जनप्रवृत्तौ । सन्देह एव । वृद्धो व्याघ्रः ।

२३.४. निर्धारितपाठान्तर्गतपदानां पर्यायशब्दान् लिखत ।

२३.५. सविग्रहं समासनामानि लिखत ।

दक्षिणारण्ये । कुशहस्तः । सरस्तीरे । सुवर्णकङ्कणम् । लोभाकृष्टेन । आत्मसन्देहे । अनिष्टात् । इष्टलाभे । विषसंसर्गम् । अर्थार्जनप्रवृत्तौ ।

२३.६ निर्धारितपाठस्य सरलार्थं लिखत ।

२३.७ परस्परं मेलयत ।

(क)	(ख)
१. कपोताः	(क) आलोचितम्
२. अहम्	(ख) ऊचुः
३. इदम्	(ग) गतिः
४. शुभा	(घ) गृह्यताम्
५. पान्थेन	(ङ) अपश्यम्

२३.८ कोष्ठस्थपदान्यनुसृत्य रिक्तस्थानानि पूरयत ।

१. अहं......चरन्नपश्यम् । (अरण्य)

२. व्याघ्रः कुशहस्तः.......ब्रूते । (पान्थ)

३. कदाचित्......इष्टं लभ्यते। (अनिष्ट)

४. विषयुक्तममृतमपि भवति । (मृत्यु)

५. अर्थार्जने प्रायेण .... एव भवति । (सन्देह)

६. चित्रग्रीवः .... अकथयत् । (कपोत)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

७. कपोताः .... ऊचुः । (चित्रग्रीव)

८. अनिष्टात्...शुभा न भवति । (इष्टलाभ)

९. अत्र .... सन्देहे प्रवृत्तिर्न विधेया । (आत्मन्)

१०. इदं ...... कङ्कणं गृह्यताम् । (सुवर्ण)

२३.९ वाच्यपरिर्वतनं कुरुत ।

दक्षिणारण्ये चरन्नहं कुशहस्तं व्याघ्रमपश्यम् । केनचित्पान्थेनालोचितम् । कपोताश्चित्रग्रीवमुक्तवन्तः । चित्रग्रीवेण कापि कथा कथिता । कदाचिदनिष्टमपीष्टं जनयति ।

२३.१० रेखाङ्कितपदानां निर्वचनं कुरुत ।

२३.११ निम्नपदानि प्रयुज्य वाक्यानि रचयत ।

आलोच्य । उपसृत्य । पलाय्य । समर्च्य । उपार्ज्य । निरस्य । प्राप्य । उपेत्य । अधीत्य । समीक्ष्य । प्रणम्य । संकल्प्य । संक्षिप्य । विलिख्य । प्रतिगृह्य । आघ्राय । आचम्य । विजित्य । विज्ञाय । उड्डीय । वितर्क्य । सन्तर्प्य । उपदिश्य । विद्विष्य । विधाय । सन्धाय । निधाय । अभिनन्द्य । निपत्य । संपाद्य । उत्पाद्य । संपूज्य । आपृच्छ्य । संवोध्य । प्रवोध्य । विभज्य । सभूष्य । संमन्त्र्य । निमन्त्र्य । संमान्य । विमुच्य । आरभ्य । विरुध्य । विलङ्घ्य । आलम्ब्य । अवलम्ब्य । आलोक्य । संवाह्य । विविच्य । प्रशस्य । आश्रित्य ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चतुर्विंशतितमः पाठः

२४.१ अधस्तनगद्यभागमधीत्य तदनुवर्तिनां प्रश्नानामुत्तराणि लिखत ।

तन्निरूप्यतां तावत् । प्रकाशं ब्रूते-कुत्र तव कङ्कणम् ? व्याघ्रो हस्तं प्रसार्य दर्शयति । पान्थोऽवदत् - कथं मारात्मके त्वयि विश्वासः ? व्याघ्र उवाच-शृणु रे पान्थ, प्रागेव यौवनदशायामहमतिदुर्वृत्त आसम् । अनेकगोमानुषाणां वधान्मे पुत्रा मृता दाराश्च । अतोऽहं वंशविहीनो जातः । ततः केनचिद्धार्मिकेणाहमुपदिष्टः-दानधर्मादिकं चरतु भवान् । तदुपदेशादिदानीं स्नानशीलो दाता वृद्धो गलितनखदन्तश्चास्मीति कथं न विश्वासभूमिः ? मम चैतावान् लोभविरहो येन स्वहस्तस्थमपि सुवर्णकङ्कणं यस्मैकस्मैचिद् दातुमिच्छामि । तथापि व्याघ्रो मानुषं खादतीति लोकापवादो दुर्निवारः ।

१ सुवर्णस्य कङ्कणं कुत्रासीत् ?

२ दृष्टे सुवर्णकङ्कणे पान्थः किमकथयत् ?

३ व्याघ्रः कीदृश आसीत् ?

४ व्याघ्रः कथं वंशविहीनो जातः ?

५ व्याघ्रः कस्मै किं दातुमिच्छति ?

६ कतमो लोकापवादो दुर्निवारः ?

७ धार्मिको व्याघ्रं किमुपदिष्टवान् ?

८ युवावस्थायां व्याघ्रस्य चरित्रं कीदृशमासीत् ?

९ कस्य हेतोर्व्याघ्रस्य पुत्रा दाराश्च मृताः ?

१०. कस्योपदेशेन व्याघ्रो धर्मकार्ये प्रवृत्तः ?

११ व्याघ्रो हस्तं प्रसार्य किं दर्शयति ?

२४.२ निर्धारितपाठान्तर्गतपदानां पर्यायशब्दान् लिखत ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

२४.३ विग्रहान् प्रदर्श्य समासनामानि लिखत ।

मारात्मके । यौवनदशायाम् । अतिदुर्वृत्तः । अनेकगोमानुषाणाम् । वंशहीनः । दानधर्मादिकम् । तदुपदेशात् । स्नानशीलः । गलितनखदन्तः । विश्वासभूमिः । लोभविरहः । स्वहस्तस्थम् । सुवर्णकङ्कणम् । लोकापवादः ।

२४.४ सन्धिविच्छेदं विधाय सूत्राणि लिखत ।

पान्थोऽवदत् । तन्निरूप्यताम् । व्याघ्र उवाच । प्रागेव । दाराश्च । पुत्रा मृताः । तदुपदेशात् । चैतावान् । व्याघ्रो मानुषम् । खादतीति । तथापि । व्याघ्रो हस्तम् । धार्मिकेणाहम् ।

२४.५ निर्धारितपाठस्य सरलार्थं लिखत ।

२४.६ स्वकीयवाक्येषु प्रयोग कुरुत ।

निरूप्यताम् । प्रकाशम् । ब्रूते । कुत्र । तव । त्वयि । इदानीम् । केनचित् । शृणु । दातुम् । तथापि । दुर्वृत्तः । प्राक् । अवदत् । प्रसार्य । उपदिष्टः । मम । इच्छामि । चरतु ।

२४.७ कोष्ठस्थपदान्यनुसृत्य रिक्तस्थानानि पूरयत ।

१. ... ... व्याघ्रोऽतीव दुर्वृत्त आसीत् । (युवावस्था)

२. ... ... पुत्रा मृता दाराश्च । (व्याघ्र)

३. व्याघ्रः सुवर्णकङ्कणं ... ... दित्सति । (किम्, चित्)

४. धार्मिकस्य ... ...व्याघ्रो धर्मकार्ये प्रवृतः । (उपदेश)

५. वृद्धो व्याघ्रः ... ... शीलो दाता चासीत् । (स्नान)

६. ... ... मानुषः खाद्यते । (व्याघ्र)

७. ... ... उपदेशेन व्याघ्रो दाताऽभवत् । (तत्)

८. व्याघ्रो गोमानुषाणां वधात् .... जातः । (वंशहीन)

९. केनचित् .... व्याघ्र उपदिष्टः । (धार्मिक)

१०. पान्थेन कथितम् - मारात्मके..... कथं विश्वासः ? (युष्मद्)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

२४.८ वाक्यसंश्लेपणं कुरुत ।

१. व्याघ्रो युवक आसीत् । तदा स नैकाः गा अवधीत् । तेन वहवो मानुपाश्च घातिताः । अतस्तस्य पुत्रा मृता दाराश्च परलोकङ्गताः । तेनासौ वंशहीनो जातः ।

२. कोऽपि धार्मिको व्याघ्रमुपदिप्टवान् । भो व्याघ्र, त्वं दान कुरु, धर्मं चर इति । तस्योपदेशात् स नित्यं स्नाति, प्रतिदिनं दानं करोति च ।

३. व्याघ्रो लोभेन हीनो विद्यते । स स्वहस्तस्थं सुवर्णकङ्कणं यस्मैकस्मैचिद् दित्सति । स च वृद्धोऽस्ति । तस्य नखा दन्ताश्च गलिताः सन्ति ।

२४.९ व्याघ्रपथिकयोः संवादमेकं रचयत ।

२४.१० त्रिषु लिङ्गेषु निम्नपदानि प्रयुज्य वाक्यानि रचयत ।

गच्छन् । हसन् । पठन् । क्रीडन् । चलन् । जपन् । जीवन् । ज्वलन् । तर्कयन् । दर्शयन् । नमन् । पतन् । जिघ्रन् । पिवन् । पालयन् । पूजयन् । कुर्वन् । भक्षयन् । भ्रमन् । मुञ्चन् । रचयन् । आलपन् । वदन् । वमन् । वसन् । प्रविशन् । वेष्टयन् । शिक्षयन् । श्वसन् । तिष्ठन् । स्पृशन् । स्मरन् । स्वपन् । हसन् । हिंसन् । हरन् ।

२४.११ रेखाङ्कितपदानां निर्वचनं कुरुत ।

२४.१२ प्रकृतिप्रत्ययविच्छेदं कुरुत ।

प्रसार्य । यौवनम् । हीनः । मृतः । धार्मिकः । उपदिष्टः । दाता । इदानीम् । एतावान् । दातुम् । स्वहस्तस्थम् । अपवादः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पञ्चविंशतितमः पाठः

२५.१ निम्नगद्यभागमधीत्य तदनुवर्तिप्रश्नानामुत्तराणि लिखत ।

मया धर्मशास्त्राणि पठितानि पुराणोपपुराणानि च श्रुतानि । दरिद्रेभ्यो यद् दानं दीयते तत्सफलं भवतीति तेषामस्ति सारः । त्वञ्चातीव दुर्गतस्तेन तत् तुभ्यं दातुं संयत्नोऽहम् । तदत्र सरसि स्नात्वा सुवर्णकङ्कणं गृहाण । ततो यावदसौ तद्वचः प्रतीतो लोभात्सरः स्नातुं प्रविशति तावन्महापङ्के, निमग्नः पलायितुमक्षमः । पङ्के पतितं तं दृष्ट्वा व्याघ्रोऽवदत् - "अहह । महापङ्के पतितोऽसि । अतस्त्वामुत्थापयामि ।" इत्युक्त्वा शनैः शनैरुपगम्य तेन व्याघ्रेण धृतः स पान्थोऽचिन्तयत् - यदत्र मारात्मके विश्वासः कृतस्तन्मया भद्रं न कृतम् । इति चिन्तयन्नेवासौ व्याघ्रेण व्यापादितः खादितश्च । अत एवोच्यते– कङ्कणस्य तु लोभेन मग्नः पङ्के सुदुस्तरे । वृद्धव्याघ्रेण संप्राप्तः पथिकः स मृतो यथा ॥ अतः सर्वथाऽविचारितं कर्म न कर्तव्यम् ।

१ केन धर्मशास्त्राणि पठितानि ?
पुराणोपपुराणानि च श्रुतानि ?

२ कस्मै दत्तं दानं सफलं जायते ?

३ व्याघ्रः किमर्थं पथिकाय सुवर्णकङ्कणं दातुमैच्छत् ?

४ पथिकः कस्मात् कारणात् विश्वस्तोऽभवत् ?

५ पङ्के पतितः पान्थः केनोत्थापितः ?

६ कथं पान्थेन भद्रं न कृतम् ?

७. पथिकः कथं मृतः ?

८ अनेन पाठेन का शिक्षा लभ्यते ?

२५.२ निर्धारितपाठान्तर्गतपदानां पर्यायशब्दान् लिखत ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

२५.३ विग्रहान् प्रदर्श्य समासनामानि लिखत ।

धर्मशास्त्राणि । पुराणोपपुराणानि । दुर्गतः । सफलम् । सयत्नः । सुवर्णकङ्कणम् । तद्वचःप्रतीतः । महापङ्के । अक्षमः । मारात्मके । अविचारितम् । सुदुस्तरे । वृद्धव्याघ्रेण ।

२५.४ सन्धिविच्छेदं कुरुत ।

भवतीति । त्वञ्च । दुर्गतस्तेन । सयत्नोऽहम् । तदत्र । यावदसौ । तद्वचः । तावन्महापङ्के । व्याघ्रोऽवदत् । निपतितोऽसि । इत्युक्त्वा । चिन्तयन्नेव । सर्वथाऽविचारितम् । एवासौ ।

२५.५ प्रकृतिप्रत्ययविच्छेदं कुरुत ।

पठितम् । श्रुतम् । दानम् । दातुम् । प्रतीतः । स्नातुम् । कृतम् । चिन्तयन् । व्यापादितः । खादितः । सर्वथा । कर्तव्यम् । अत्र । उपगम्य । उक्त्वा । धृतः । संप्राप्तः । अविचारितम् । स्नात्वा । पतितः । निमग्नः । मृतः । दृष्ट्वा ।

२५.६ निर्धारितपाठस्य सरलार्थं लिखत ।

२५.७ स्वकीयवाक्येषु प्रयोगं कुरुत ।

दरिद्रेभ्यः । तुभ्यम् । स्नात्वा । दातुम् । पलायितुम् । दृष्ट्वा । चिन्तयन् । दीयते । उपगम्य । अतीव । अत्र । सरसि । भद्रम् । यथा । सर्वथा । कर्तव्यम् । यावद् । अतः । असौ । व्यापादितः । खादितः ।

२५.८ वाक्यसंश्लेषणं कुरुत ।

१. मया धर्मशास्त्रं पठितम् । अहं पुराणानि श्रुतवान् । त्वं दुर्गतोऽसि । अतस्तुभ्यं सुवर्णकङ्कणं दित्सामि ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

२. भो पान्थ, प्रथमं सरसि स्नाहि । इदं सुवर्णकङ्कणं मम हस्ते विद्यते । अहं तत्कङ्कणं तुभ्यं दित्सामि । त्वं गृहाण ।

३. व्याघ्रवाक्येन पान्थो विश्वस्तः । स सरसि स्नातुं गतः । स महापङ्के निमग्नः । स व्याघ्रेण धृतः । पथिकोऽचिन्तयत् । व्याघ्रेण व्यापादितः । तेन स खादितः ।

२५.९ कोष्ठस्थपदान्यनुसृत्य रिक्तस्थानानि पूरयत ।

१. मया धर्मशास्त्राणि.........ज्ञानं लब्धम् (पठ्) ।

२. व्याघ्रः पान्थाय सुवर्णकङ्कणं...ऐच्छत् (दा) ।

३. पान्थः सरः....प्रविष्टवान् (स्ना) ।

४. पङ्के पतितं पान्थं .... व्याघ्रोऽवदत् (दृश्) ।

५. त्वामुत्थापयामीति.... व्याघ्रः सरः प्रविष्टवान् (वच्) ।

६. व्याघ्रः शनैः पान्थम् ......धृतवान् (उत्-स्था) ।

७. धृतं पान्थं......व्याघ्रः खादितवान् (वि-आप्) ।

२५.१० वाक्यविश्लेपणं कुरुत ।

यावदसौ तद्वचःप्रतीतो लोभात्सरः स्नातुं प्रविशति तावन्महापङ्के निमग्नः पलायितुमक्षमो वृद्धव्याघ्रेण धृतो व्यापादितः खादितश्च ।

२५.११ निम्नपदानि प्रयुज्य वाक्यानि रचयत ।

अध्यापयितुं । कोपितुम् । कूजितुम् । कर्तुम् । क्रेतुम् । क्षिप्तुम् । खादितुम् । गदितुम् । ग्रथितुम् । मातुम् । पातुम् । छादयितुम् । जनयितुम् । जेतुम् । जीवितुम् । टङ्कयितुम् । तर्पयितुम् । दण्डयितुम् । दग्धुम् । धातुम् । ध्यातुम् । नर्तितुम् । पठितुम् । पलायितुम् । पुष्पितुम् । पूजयितुम् । पूरयितुम् । प्रष्टुम् । वोद्धुम् । वक्तुम् । भक्षयितुम् । सर्पितुम् । भाषितुम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भेत्तुम् । भर्तुम् । मृगयितुम् । याचितुम् । रक्षितुम् । रचयितुम् । लब्धुम् । वेपितुम् । स्नातुम् । ज्ञातुम् । त्रातुम् ।

२५.१२ "सर्वथाऽविचारितं कर्म न कर्तव्यम्" इत्युक्तेराशयः प्रसङ्गमनुसृत्य प्रकाशयत ।

२५.१३ रेखाङ्कितपदानां निर्वचनं कुरुत ।

२५.१४ कर्तृकर्मपदान्यन्विष्य लिखत ।

२५.१५. वाच्यपरिवर्तनं कुरुत ।

१. सरसि स्नात्वा सुवर्णकङ्कणं गृहाण ।

२. पङ्के पतितं त्वामहमुत्थापयामि ।

३. कङ्कणलोभेन पङ्के निमग्नः पान्थो व्याघ्रेण धृतः।

४. व्याघ्रेण धृतः पान्थश्चिन्तितः

५. उत्थापितः पथिको व्याघ्रेण घातितः खादितश्च।

२५.१६ कमपि विषयमवलम्ब्य संवादमेकं रचयत ।

२५.१७ समुचितैः पदैः संयोजयतः ।

१. शिक्षकश्छात्रानध्यापयति । स विद्यालयं गच्छति ।

२. खगाः कूजन्ति । ते वृक्षेषु तिष्ठन्ति ।

३. अहं कन्दुकं क्षिपामि । अहं प्राङ्गणे गच्छामि ।

४. ताः फलानि खादन्ति । ता उद्यानं गच्छन्ति ।

५. तौ कार्यालयं गच्छतः तौ कार्यं कर्तुमिच्छतः ।

६. सा पुष्पाणि चिनोति । सा गन्धं घ्रातुं वाञ्छति ।

७. युवां जलाशयं गच्छथः । युवां जलं पातुं वाञ्छथः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

८. वालिका कार्यालयं याति । सा पत्रं टङ्कयितुं काङ्क्षति ।

९. वालकाः मन्दिरं गच्छन्ति । ते देवान् पूजयितुमीप्सन्ति ।

१०. रामो ध्वनियन्त्रमुद्घाटयति । स वार्तां श्रोतुं काङ्क्षति ।

११. युवत्यो धारागृहं गच्छन्ति । ताः जलं घटेषु पूरयितुं वाञ्छन्ति ।

१२. वयं चलचित्रं पश्यामः । वयं मनो रञ्जयितुमिच्छामः ।

१३. रामो वनमगच्छत् । स लङ्केश्वरं हन्तुं वाञ्छति ।

१४. रावणः सीतामहरत् । स रामं कोपयितुं काङ्क्षति ।

१५. छात्राः सम्यक् पठन्ति । ते परीक्षामुत्तरितुमिच्छन्ति ।

१६. मया पुस्तकानि विलोकितानि । अहं ज्ञातुमिच्छामि ।

१७. युवका दृश्ययन्त्रमुद्घाटयन्ति । ते वृतान्तं द्रष्टुमिच्छन्ति ।

१८. नेतारो मञ्चं गतवन्तः । ते भाषितुं वाञ्छन्ति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

षड्विंशतितमः पाठः

२६.१ निम्नगद्यभागमधीत्य तदनुवर्तिनां प्रश्नानामुत्तराणि लिखत ।

एतद्वचनं श्रुत्वा कश्चित् कपोतः सदर्पमाह- आः किमेवमुच्यते ? आपत्काले वृद्धानां वचनं ग्राह्यं, सर्वत्रैवं विचारे तु भोजनेऽपि प्रवृत्तिर्न स्यात् । एतच्छ्रुत्वा सर्वे कपोतास्तत्रोपविष्टा जालेन वद्धा वभूवुः । ततो यस्य वचनात्तत्रावलम्बितास्तं सर्वे तिरस्कुर्वन्ति स्म । तस्य तिरस्कारं श्रुत्वा चित्रग्रीव उवाच- नायमस्य दोषः । विपत्काले विष्मय एव कापुरुषलक्षणम् । तदत्र धैर्यमवलम्ब्य प्रतीकारश्चिन्त्यताम् । इदानीमेवं क्रियताम् । सर्वैरेकचित्तीभूय जालमदायोड्डीयताम् । इति विचिन्त्य सर्वे पक्षिणो जालमादायोत्पतिताः ।

१. कस्य वचनात् कपोता जालेन वद्धाः ?

२. सर्वे कं तिरस्कुर्वन्ति स्म ?

३. विपत्तौ चिन्तनीयो विषयः कोऽस्ति ?

४. अन्ते जालवद्धाः कपोताः किमकुर्वन् ?

५ कापुरुषस्य लक्षणं किमस्ति ?

२६.२ निर्धारितपाठान्तर्गतपदानां पर्यायशब्दान् लिखत ।

२६.३ सविग्रहं समासनामानि लिखत ।

आपत्काले । सदर्पम् । चित्रग्रीवः । कापुरुषलक्षणम् । एकचित्तीभूय । विपत्काले ।

२६.४ सन्धिविच्छेदं कुरुत ।

एतद्वचनम् । सर्वत्रैवम् । भोजनेऽपि । विष्मय एव । बद्धा बभूवुः । तात्रावलम्बिताः । नायम् । आदायोड्डीयताम् । एतच्छ्रुत्वा । चित्रग्रीव उवाच ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

२६.५ निर्धारितपाठस्य सरलार्थं लिखत ।

२६.६ प्रकृतिप्रत्ययविच्छेदं कुरुत ।

श्रुत्वा । वचनम् । उपदिष्टः । बद्धः । अवलम्ब्य । इदानीम् । आदाय । विचिन्त्य । उत्पतितः । पक्षिणः । प्रवृत्तिः । ग्राह्यम् ।

२६.७. वाच्यपरिवर्तनं कुरुत ।

सर्वैः जालमादायोड्डीयताम् । प्रतीकारश्चिन्त्यताम् । आः किमेवमुच्यते । इदानीमेवं क्रियताम् । कपोतास्तं तिरस्कुर्वन्ति । आपत्काल एव वृद्धानां वचनं गृह्यते ।

२६.८ स्वकीयवाक्येषु प्रयोगं कुरुत

श्रुत्वा । सदर्पम् । अवलम्ब्य । चिन्त्यताम् । क्रियताम् । आदाय । विचिन्त्य । उत्पतितः । पक्षिणः । एवम् । तत्र । एकचित्तीभूय । अस्य । एवम् ।

२६.९. वाक्यविश्लेषणं कुरुत ।

१. चित्रग्रीवस्य वचनं निशम्य क्रुद्धेन कपोतेन पारावतास्तण्डुलभक्षणाय प्रेरिताः ।
२. सर्वे कपोतास्तत्रोपविष्टा जालेन बद्धास्तं तिरस्कुर्वन्ति स्म ।
३. चित्रग्रीवस्य वचनमनुसरन्तः कपोताः प्रतीकारोपायं चिन्तयन्तो जालमादायोत्पतितवन्तः।

२६.१० कोष्ठस्थपदान्यनुसृत्य रिक्तस्थानानि पूरयत ।

१. चित्रग्रीवस्य वचनं ....कपोता आहुः । (नि-शम्)
२. एतत्................सर्वे कपोतास्तत्रोपविष्टाः । (आ-कर्ण्)
३. सर्वे धैर्य......प्रतीकारोपायमचिन्तयन् । (कृ)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

४. कपोताः प्रतीकारोपायं ....जालमादायोद्गताः । (वि-चिन्त्)

५. सर्वे एकचित्ता जालं ....उत्पतिताः । (ग्रह्)

६. तान्.........चित्रग्रीवो व्यरमत् । (उपदिश्)

७. चित्रग्रीवस्य वचनं .... सर्वे कपोताः सजालमुद्गता । (अनु-सृ)

८. कपोतानाञ्चरित्रं .... चित्रग्रीवश्चकितः । (वि-लोक्)

९. जालम् ......उत्पतिताः कपोताः दूरङ्गताः । (आ-दा)

२६.११ कमपि विषयमवलम्ब्यानुच्छेदमेकं रचयत ।

२६.१२ वाक्यसंश्लेषणं कुरुत ।

१. कपोताश्चित्रग्रीवस्य वचनं श्रुतवन्तः । तेषु कश्चन कपोतस्तस्मै, अकुप्यत् ।

२. आपत्तौ वृद्धानां वचनं समुचितं भवति । यदि सर्वत्र शङ्का क्रियते तदा लोकव्यवहार एवावरुद्धो भविष्यति । अतश्चित्रग्रीवस्य वाक्यं स्वीकर्तुं न शक्यते ।

३. सर्वे कपोता एकस्य कपोतस्य वचनं श्रुतवन्तः। ततस्तस्य वचनं समुचितं मत्वा सर्वे कपोताः तण्डुलकणानां भक्षणाय भूमौ, अवातरन् । ततस्ते जालेन बद्धा अभवन् । यस्य वचनेन ते जालेन बद्धाः सर्वे कपोतास्तमेव तिरस्कृतवन्तः ।

४. चित्रग्रीवः कपोतानां तिरस्कारवचनमशृणोत् । ततः स कपोतस्य दोषं निराकृतवान् । स प्रतीकारोपायस्यान्वेषणाय प्रेरयति स्म । ततश्चित्रग्रीवस्याशयमनुसरन्तः कपोता जालमादायोत्पतितवन्तः ।

२६.१३ "आपत्काले विष्मय एव कापुरुषलक्षणम् "इत्यस्याशयं प्रकाशयत ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

२६.१४ परस्परं मेलयत ।

(क)	(ख)
१. श्रुत्वा	(क) जालम्
२. उपविष्टाः	(ख) पाशेन
३. वद्धाः	(ग) भूमौ
४. चिन्त्यताम्	(घ) वचनम्
५. आदाय	(ङ) प्रतीकारः

२६.१५ रेखाङ्कितपदानां निर्वचनं कुरुत ।

२६.१६ समुचितैः पदैः संयोजयत ।

१. रामो विद्यालयं गच्छति । स पाठं पठति ।
२. त्वं पुस्तकानि पठसि । त्वं लेखं लिखसि ।
३. ते धर्मशास्त्राणि पठन्ति । ते धर्ममाचरन्ति ।
४. वयं गायामः । वयं नृत्यामः ।
५. नेतारो मञ्चं गच्छन्ति । ते भाषणं कुर्वन्ति ।
६. छात्राश्चत्वरं गच्छन्ति । ते कन्दुकेन क्रीडन्ति।
७. वानरा वृक्षमारोहन्ति । ते फलं खादन्ति ।
८. पूजको मन्दिरं गच्छति । स शिवमर्चयति ।
९ गुरवो विद्यालयं गच्छन्ति । ते छात्रान् पाठयन्ति ।
१०. कपोता भूभौ पतन्ति । ते जालेन वद्धा भवन्ति ।
११. मया लेखा लिखताः । मया लेखाः प्रकाशिताः।
१२. वहूनि मन्दिराणि विलोकितानि । मम मनः प्रसन्नमभूत् ।
१३. सूर्यः स्वयं प्रकाशते । सोऽन्यान् प्रकाशयति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

१४. बुधः सूर्यस्य समीपे तिष्ठति । स सूर्यं परिक्रामति ।

१५. ध्रुवोऽचलस्तिष्ठति । सोऽन्यान् चालयति ।

१६. धूमकेतुः सूर्यसमीपं गच्छति । स प्रकाशते ।

१७. कविः काव्यं सृजति । सोऽलङ्कारान् प्रयुङ्क्ते ।

१८. भावकः काव्यानि पठति । स काव्यानि समीक्षते

१९. छात्रा न्यायशास्त्रं पठन्ति । ते पदार्थान् समीक्षन्ते ।

२०. वालिका व्याकरणमधीते । सा शव्दान् सम्यक् प्रयोक्तुं जानाति ।

२१. त्वं ज्यौतिपं पठसि । त्वं ग्रहाणां गतिं गणयसि ।

२२. कालिदासः काव्यान्यसृजत् । स ख्यातिं प्राप्तवान् ।

२३. व्यासो महाभारतमरचयत् । स पुराणानि च प्रणिनाय ।

२४. देवपत्तने पशुपतेर्मन्दिरमस्ति । तं द्रष्टुं वयं गच्छामः ।

२५. विद्वांसः शीलापत्रं पठन्ति । ते नेपालस्येतिहासं ज्ञास्यन्ति ।

२६.१७निम्नपदानि प्रयुज्य वाक्यानि रचयत ।

प्राप्तव्यम् । कर्तव्यम् । ईक्षितव्यम् । आकर्षितव्यम् । चलितव्यम् । कल्पयितव्यम् । क्षन्तव्यम् । क्षिप्तव्यम् । खादितव्यम् । गन्तव्यम् । गोपितव्यम् । गुम्फितव्यम् । ग्रहीतव्यम् । चेतव्यम् । चूर्णयितव्यम् । जनितव्यम् । जेतव्यम् । जीवितव्यम् । ज्ञातव्यम् । टङ्कयितव्यम् । ताडयितव्यम् । त्रपितव्यम् । त्रोटयितव्यम् । दग्धव्यम्। दातव्यम् । दोग्धव्यम् । पातव्यम् । पूजयितव्यम् । वक्तव्यम् । भेतव्यम् ।

२६.१८ निर्धारितपाठान्तर्गतानि कर्तृकर्माधिकरणपदान्यन्विष्य लिखत ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सप्तविंशतितमः पाठः

२७.१ निम्नगद्यभागमधीत्य तदनुवर्तिनः प्रश्नाः समाधेयाः ।

अनन्तरं स व्याधः सुदूराज्जालापहारकान् तान् विलोक्य पश्चादधावत् । ततश्चक्षुविषयाक्रान्तेषु तेषु कपोता ऊचुः - किमिदानीं कर्तुमुचितम् ? चित्रग्रीव उवाच- अस्माकं मित्रं हिरण्यको नाम मूषकराजः गण्डकीतीरे चित्रवने वसति । सोऽस्माकं पाशाँश्छेत्स्यति । इत्यालोच्य सर्वे हिरण्यक-विवरसमीपं गताः । हिरण्यकश्च सर्वदापायशङ्कया शतद्वारं विवरं कृत्वा निवसति स्म । ततो हिरण्यकः कपोतावपातभयाच्चकितस्तूष्णीं स्थितः । सखे हिरण्यक, किमस्मान् न संभाषसे ? ततो हिरण्यकस्तद्वचनं प्रत्यभिज्ञाय ससंभ्रमं वहिर्निःसृत्याब्रवीत्- "आः पुण्यवानस्मि । प्रियसुहृन्मे चित्रग्रीवः समायातः ।

१. व्याधः किमर्थमधावत् ?
२. अदृष्टेषु कपोतेषु व्याधः किमकरोत् ?
३. निवृत्तं लुब्धकं विलोक्य कपोतैः किं विचारितम् ?
४. हिरण्यकः कस्य मित्रमस्ति ? स च कुत्र वसति ?
५. हिरण्यकेन किमर्थं शतद्वारं विवरं कृतम् ?
६. चित्रग्रीवस्य वचनं श्रुत्वा हिरण्यकेन किं कृतम् ?
७. हिरण्यकः कथं चकितः ?
८. कपोताः किमर्थं चित्रवनङ्गताः ?

२७.२ सविग्रहं समासनामानि लिखत ।

जालापहारकान् । चक्षुविषयाक्रान्तेषु । मूषकराजः । गण्डकीतीरे । हिरण्यकविवरसमीपम् । अपायशङ्कया । शतद्वारम् । कपोतावपातभयात् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

२७.३ सन्धिविच्छेदं कुरुत ।

व्याधो निवृत्तः । कपोता ऊचुः । सोऽस्माकम् । इत्यालोच्य । हिरण्यकश्च । सर्वदाऽपायशङ्कया । भयाच्चकितः । सुहृन्मे । तद्वचनं । प्रत्यभिज्ञाय ।

२७.४ निर्धारितपाठान्तर्गतपदानां पर्यायशब्दान् लिखत ।

२७.५ प्रकृतिप्रत्ययविच्छेदं कुरुत ।

दृष्ट्वा । निवृत्तः । कर्तुम् । उचितम् । आलोच्य । गतः । कृत्वा । सर्वदा । स्थितः । प्रत्यभिज्ञाय । निस्सृत्य। पुण्यवान् । आयातः ।

२७.६ स्वकीयवाक्येषु प्रयोगं कुरुत ।

विलोक्य । निवृत्तः । दृष्ट्वा । तूष्णीम् । प्रत्यभिज्ञाय । निस्सृत्य । कृत्वा । ससंभ्रमम् । पश्चाद् । इदानीम् ।

२७.७ निर्धारितगद्यभागस्य सरलार्थं लिखत ।

७.८ वाच्यपरिवर्तनं कुरुत ।

व्याधो जालापहारकान् तानपश्यत् । कपोतैः लुब्धकं दृष्टम् । हिरण्यकः कपोतानां पाशाँश्छेत्स्यति । हिरण्यकेन शतद्वाराणि विवराणि कृतानि । हिरण्यकश्चित्रग्रीवस्य वचनं प्रत्यभिज्ञातवान् । सर्वे कपोताः पाशच्छेदोपायमालोचितवन्तः ।

२७.९ वाक्यविश्लेषणं कुरुत ।

१. अनन्तरं स व्याधः सुदूराज्जालापहरकान् तान् विलोक्य पश्चाद् धावन् चक्षुविषयाक्रान्तान् कपोतान् ज्ञात्वा निवृत्तः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

२ लुब्धकं निवृत्तं विलोक्य कपोताः पाशच्छेदनाय गण्डकीतीरे चित्रवने वसतो हिरण्यकस्य समीपं गतवन्तः ।

३. कपोतावपातभयात्तूष्णीं स्थितो हिरण्यकश्चित्रग्रीवस्य वचनं निशम्य ससंभ्रमं वहिनिस्सृत्य तत्समीपङ्गतवान् ।

२७.१० वाक्यसंश्लेषणं कुरुत ।

१. कपोताः जालमादायोद्गताः । व्याधो दूरादेव तानपश्यत् । ततः स पश्चादधावत् । कपोता अदृश्याः सञ्जाताः । व्याधो निवृत्तः ।

२. कपोता लुब्धकं निवृत्तं ज्ञातवन्तः । ततस्ते प्रतीकारोपायमचिन्तयन् । कपोता जालच्छेदाय चित्र-वनङ्गताः । चित्रवनञ्च गण्डकीतीरे आसीत् । तत्र हिरण्यकः प्रतिवसति स्म । स च मूषकानां राजासीत् ।

३. चित्रग्रीवस्य वचनं हिरण्यकः श्रुतवान् । ततः स विवराद् वहिरागतवान् । निसृते च तस्मिन् चित्रग्रीवो हिरण्यकमपश्यत् । हिरण्यकश्च चित्रग्रीवं विलोक्य परां मुदमलभत ।

२७.११ रेखाङ्कितपदानां निर्वचनं कुरुत ।

२७.१२ कोष्ठस्थपदान्यनुसृत्य रिक्तस्थानानि पूरयत ।

१. हिरण्यकः कपोतानां .... छेत्स्यति (पाश) ।

२ लुब्धकः सुदूरात् .... विलोक्य पश्चादधावत् (तत्) ।

३. इति .... कपोता हिरण्यकविवरङ्गताः (आ-लोच्) ।

४. हिरण्यकश्चित्रग्रीवस्य वचनं .... बहिर्निगतः (प्रति-अभि-ज्ञा) ।

५. हिरण्यकः शतद्वारं विवरं..... वसति स्म (कृ) ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

६. हिरण्यको विवरात्............चित्रग्रीवं दृष्टवान् (नि. सृ) ।

७. कपोता लुब्धकं निवृत्तं .... ऊचुः (दृश्) ।

८. जालापहारकान् तान् ....पश्चादधावत् । (विलोक्)

९. इति ....सर्वे हिरण्यकविवरसमीपङ्गताः । (आ-लोक्)

१०. इदानीं किं ....उचितम् । (कृ)

२७.१३चित्रग्रीवहिरण्यकयोः संवादमेकं रचयत ।

२७.१४ निंम्नपदानि प्रयुज्य वाक्यानि रचयत ।

अन्वेषणीयम् । अध्ययनीयम् । ईक्षणीयम् । कम्पनीयम् । करणीयम् । कर्तनीयम् । कर्षणीयम् । क्रयणीयम् । क्षेपणीयम् । गणनीयम् । गवेषणीयम् । गोपनीयम् । जपनीयम् । तर्जनीयम् । तेजनीयम् । तर्पणीयम् । दानीयम् । दहनीयम् । दोषणीयम् । दर्शनीयम् । धरणीयम् । नन्दनीयम् । नमनीयम् । निन्दनीयम् । पठनीयम् । पानीयम् । पालनीयम् । प्रच्छनीयम् । प्लवनीयम् । वोधनीयम् । यजनीयम् । भोजनीयम् । भरणीयम् । मण्डनीयम् । मननीयम् । मार्जनीयम् । स्मरणीयम् । याचनीयम् । योजनीयम् । रक्षणीयम् । रोधनीयम् । रोहणीयम् । लेपनीयम् । वेदनीयम् । वेष्टनीयम् । शङ्कनीयम् । श्रवणीयम् । सूचनीयम् । स्वापनीयम् । हिंसनीयम् । हरणीयम् ।

२७.१५ समुचितैः पदैः संयोज्य यथासंभवमधिकानि वाक्यानि रचयत ।

१. रामः पठन्नस्ति । स परीक्षामुत्तरति ।

२. कृष्णौ गच्छन्तौ स्तः । तौ चलचित्रं विलोकयतः ।

३. बालकाः गायन्तः सन्ति । ते मृदङ्गं वादयन्ति ।

४. सा हसन्तं बालकं पश्यति । सा ग्रामं गच्छति ।

५. ते कार्यं कुरुतः । ते सचिवालयं गच्छतः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

६. ताः पत्राणि लिखन्ति । ताः पत्राणि टङ्कयन्ति ।

७. वृक्षात् फले पततः । अहं फले भक्षयामि ।

८. लतायां पुष्पाणि विकसितानि । तौ तानि जिघ्रतः ।

९. कालिदासः काव्यान्यसृजत् । तेन प्रसिद्धिर्लब्धा।

१०. रामस्य वाणा निशिता आसन् । रामस्तैर्रावणं जघान ।

११. वृक्षे खगो वसति । तस्य द्वौ पक्षौ स्तः ।

१२. मया रामायणं श्रुतम् । मया ज्ञानं लब्धम् ।

१३. स व्याकरणशास्त्रं पठति । तस्य वुद्धिस्तीक्ष्णा विद्यते ।

१४. ते शास्त्राणि पठन्ति । तेपु मम विश्वासोऽस्ति ।

१५. चन्द्रोऽस्तङ्गतः । रजनी व्यतीता ।

१६. रात्री गता । अरुणोदयः सञ्जातः ।

१७. वालको जातः । माता प्रसन्नाऽभवत् ।

१८. पिता गतः । वालो व्यलपत् ।

१९. पृथ्वी सूर्यं परिभ्रमति । अचलोऽपि स गच्छन् दृश्यते ।

२० जनाः काव्यानि पठन्ति । ते नितान्तमानन्दमनुभवन्ति ।

२१. शिक्षकाः छात्रान् सम्यक् पाठयन्ति । छात्रास्तान् आद्रियन्ते ।

२२. वैद्या व्याधिताय भेषजं ददाति । रोगी रोगान्मुच्यते ।

२३. मेंघा घोरगर्जनं कुर्वन्ति । ते वर्षासु जलं वर्षन्ति ।

२४. गुरुर्मा सम्यक् पाठितवान् । तस्मै नमोऽस्तु ।

२५. वयं व्याघ्राद् विभीमः । स भीषणोऽस्ति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अष्टाविंशतितमः पाठः

२८.१ निम्नलिखितगद्यभागमधीत्य तदनुवर्तिनां प्रश्नानामुत्तराणि लिखत ।

पाशावद्धांश्चैतान् दृष्ट्वा सविस्मयः क्षणं स्थित्वा हिरण्यक उवाच- सखे, किमेतत् ? चित्रग्रीवोऽवदत्- अस्माकं प्राक्तनजन्मकर्मणः फलमेतत् । एतच्छ्रुत्वा हिरण्यकश्चित्रग्रीवस्य बन्धनं छेत्तुं सत्वरमुपर्सपति । चित्रग्रीव उवाच- मा मैवम् । अस्मदाश्रितानामेषान्तावत् पाशांश्छिन्धि तदा मम पाशान् पश्चात् छेत्स्यसि । हिरण्यकोऽप्याह- अहमल्पशक्तिः, दन्ताश्च मे कोमलाः । तदेतेषां पाशान् छेत्तुं कथं समर्थः । तद् यावन्मे न दन्तास्त्रुट्यन्ति तावत्तव पाशान् छिनद्मि, तदनन्तरमेषामपि वन्धनं यावच्छक्यं छेत्स्यामि । चित्रग्रीव उवाच- अस्त्वेवम्, तथापि यथाशक्त्येतेषां बन्धनं खण्डय । आत्मपरित्यागेन यदाश्रितानां परिरक्षणं तन्न नीतिविदां संमतम् । चित्रग्रीव उवाच- नीतिस्तावदीदृश्येव । किन्त्वहमस्मदाश्रितानां दुःखं सोढुं सर्वथाऽसमर्थः । तेनेदं ब्रवीमि । इत्याकर्ण्य हिरण्यकः प्रहृष्टमना पुलकितः सन्नब्रवीत् - मित्र, साधु, अनेनाश्रितवात्सल्येन त्रैलोक्यस्यापि प्रभुत्वं त्वयि युज्यते । एवमुक्त्वा तेन सर्वेषां बन्धनानि छिन्नानि । ततो हिरण्यकः सर्वान् सादरं संपूज्याह- सखे चित्रग्रीव, सर्वथात्र जालबन्धनविधौ दोषमाशङ्क्यात्मनि, अवज्ञा न कर्तव्या । इति प्रबोध्यातिथ्यञ्च कृत्वा संप्रेषितश्चित्रगुप्तो यथेष्टदेशान् सपरिवारो ययौ । हिरण्यकोऽपि स्वविवरं प्रविष्टः ।

१. हिरण्यकः किमर्थञ्चकितः ?

२. जालबद्धं चित्रग्रीवं विलोक्य हिरण्यकेन किं कृतम् ?

३. केषां दुःखं सोढुं न शक्यते ?

४. हिरण्यकः कस्य हेतोः पुलकितः ?

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

५. कपोतानां वन्धनानि केन छिन्नानि ?

६. नीतिविदां संमतं किं नास्ति ?

७. चत्रग्रीवे कथं त्रैलोक्यस्य प्रभुत्वं युज्यते ?

८. हिरण्यकेन किं कृत्वा चित्रग्रीवः प्रेषित ?

९. चित्रग्रीवः कुत्र गतवान् ?

१०. अल्पशक्तिः कः, दन्ताश्च कस्य कोमलाः सन्ति ?

११. अनेन पाठेन का शिक्षा लभ्यते ?

२८.२ निर्धारितपाठान्तर्गतपदानां पर्यायशब्दान् लिखत ।

२८.३ सविग्रहं समासनामानि लिखत ।

पाशवद्धान् । सविस्मयः । अल्पशक्तिः । यावच्छक्यम् । आत्मपरित्यागेन । परिरक्षणम् । नीतिविदाम् । प्रहृष्टमनाः । आश्रितवात्सल्येन । सादरम् । जालवन्धनविधौ । यथेष्टदेशान् । सपरिवारः । स्वविवरम् । यथाशक्ति ।

२८.४ सन्धिविच्छेदं कुरुत ।

चैतान् । हिरण्यक उवाच । बद्धाँश्चैतान् । मैवम् । यावच्छक्यम् । पाशाँश्छिन्धि । हिरण्यकोऽपि । अप्याह । अस्त्वेवम् । यथाशक्त्येतेषाम् । नीतिस्तावत् । ईदृश्येव। किन्त्वहम् । सर्वथासमर्थः । इत्याकर्ण्य । सन्नब्रवीत् । त्रैलोक्यस्यापि । संपूज्याह । तेनेदम् । सर्वथात्र । ततो हिरण्यकः । आशङ्क्यात्मनि । प्रवोध्यातिथ्यम् । संप्रेषितश्चित्रगुप्तः । हिरण्यकोऽपि ।

२८.५ प्रकृतिप्रत्ययविच्छेदं कुरुत ।

दृष्ट्वा । स्थित्वा । श्रुत्वा । बन्धनम् । छेत्तुम् । आश्रितः । रक्षणम् । आकर्ण्य । वात्सल्यम् । प्रभुत्वम् । त्रैलोक्यम् । उक्त्वा ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आशङ्क्य । प्रबोध्य । आतिथ्यम् । संप्रेषितः । प्रविष्टः । सोढुम् । संपूज्य ।

२८.६ निर्धारितपाठस्य सरलार्थं लिखत ।

२८.७ वाक्यसंश्लेषणं कुरुत ।

कपोताः पाशबद्धा आसन् । हिरण्यकस्तान् दृष्टवान् । ततः स सविस्मयोऽभवत् । हिरण्यकश्चित्रग्रीवस्य वन्धनं छेत्तुमुपासर्पत् ।

२८.८. वाच्यपरिवर्तनं कुरुत ।

१. हिरण्यको जालवद्धान् कपोतानपश्यत् ।

२. तावदेतेषां पाशान् छिन्धि, ततो मम छेत्स्यसि ।

३. हिरण्यकेन सर्वेषां बन्धनानि छिन्नानि ।

४. मूषकेनातिथ्यं कृत्वा सपरिवारश्चित्रग्रीवः संप्रेषितः ।

५. हिरण्यकः स्वविवरं प्राविशत् ।

२८.९ वाक्येषु प्रयोगं कुरुत ।

उपेक्षमाणः । क्रीणानः । लभमानः । भाषमाणः । कुर्वाणः । वर्तमानः । वर्धमानः । ईक्षमाणः । यतमानः । संपद्यमानः । छिद्यमानः । जायमानः । दह्यमानः । उपदिश्यमानः । चिन्वानः । ग्रथ्यमानः । कृष्यमाणः । निरस्यमानः । शयानः । शोभमानः । स्पर्धमानः । याचमानः । यतमानः । मुच्यमानः । मीमांसमानः । भिक्षमाणः ।

२८.१० हिरण्यकचित्रगुप्तयोः संवादमेकं रचयत ।

२८.११ समुचितैः पदैः संयोज्य यथासंभवमधिकानि वाक्यानि रचयत ।

१. रामः सम्यक् पठति, परीक्षामुत्तरति च ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

२. स पुस्तकं क्रीणाति, सम्यक् पठति च ।

३. बालका वर्धन्ते, सुन्दराश्च दृश्यन्ते ।

४. बालिका जायते, क्रन्दति च ।

५. हिमशिखराणि शोभन्ते, पर्यटकान् आकर्षन्ति च ।

६. माला ग्रथ्यन्ते, ताः सुन्दर्यो वीक्ष्यन्ते ।

७. यतिर्भिक्षते, स गच्छति ।

८. गावो मुच्यन्ते, ताः सहर्षं धावन्ति ।

९. छात्रा लेखनाय स्पर्धन्ते, एकः प्रथमस्थानं लभते ।

१०. स व्याकरणमधीते, स व्युत्पत्तिञ्च वर्धयति ।

२८.१२ रेखाङ्कितपदानां निर्वचनं कुरुत ।

२८.१३ वाक्यंविश्लेषणं कुरुत ।

१. कपोतान् दृष्ट्वा सविस्मयः क्षणं स्थित्वा हिरण्यकश्चित्रग्रीवस्य पाशान् छेत्तुं सत्वरमुपसृतवान् ।

२. हिरण्यकः कपोतान् सादरं संपूज्य तान् प्रबोध्यातिथ्यं कृत्वा संप्रेष्य च स्वविवरं प्रविष्टः ।

२८.१४ निर्धारितपाठान्तर्गतानि क्रियापदानि विलिख्य वाक्येषु प्रयोगञ्च कुरुत ।

२८.१५ कर्तृपदानि कर्मपदानि चान्विष्य लिखत ।

○

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एकोनत्रिंशत्तमः पाठः

२९.१ अधोलिखितगद्यभागमधीत्य तदनुवर्तिनां प्रश्नानामुत्तराणि लिखत ।

अथ लघुपतनकनामा काकः सर्ववृतान्तदर्शी साश्चर्यमिदमाह- अहो हिरण्यक, श्लाघ्योऽसि । अतोऽहमपि त्वया सह मैत्रीमिच्छामि । अतो मां मैत्र्येणानुग्रहीतुमर्हसि । एतच्छ्रुत्वा हिरण्यकोऽपि विवराभ्यन्तरादाह- कस्त्वम् ? काको ब्रूते- लघुपतनकनामा वायसोऽहम् । हिरण्यको विहस्याह- का त्वया सह मैत्री ? भक्ष्यभक्षकयोः प्रीतिर्विपत्तेः कारणं भवति यथा शृगालात्पाशवद्धो मृगः काकेन रक्षितः । वायस आह- कथमेतत् ?

१. लघुपत्नकः कीदृशोऽस्ति ?

२. स केन सह मैत्रीमिच्छति ?

३. काकः केनानुग्रहीतुं हिरण्यकं निवेदयति ?

४. विपत्तेः कारणं किम् ?

५. कयोः प्रीतिर्न भवति ? कश्चात्र दृष्टान्तः ?

२९.२ निर्धारितपाठान्तर्गतपदानां पर्यायशब्दान् लिखत ।

२९.३. सविग्रहं समासनामानि लिखत ।

लघुपतनकनामा । सर्ववृतान्तदर्शी । साश्चर्यम् । विवराभ्यन्तराद् । भक्ष्यभक्षकयोः । पाशबद्धः ।

२९.४ सन्धिविच्छेदं कुरुत, सूत्राणि च लिखत ।

श्लाघ्योऽसि । अतोऽहम् । मैत्र्येणानुग्रहीतुम् । हिरण्यकोऽपि । अभ्यन्तरादाह । कस्त्वम् । विहस्याह । बद्धोऽसौ । वायस आह ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

२९.५ प्रकृतिप्रत्ययविच्छेदं कुरुत ।

श्लाघ्यः । मैत्रीम् । विहस्य । प्रीतिः । वद्धः । रक्षितः कारणम् । भक्षकः । भक्ष्यः । श्रुत्वा ।

२.६ निर्धारितपाठस्य सरलार्थं लिखत ।

२९.७ वाच्यपरिवर्तनं कुरुत ।

काक इदमकथयत् । अहं त्वया सह मैत्रीं वाञ्छामि । हिरण्यकेन विवराभ्यन्तरादुक्तम् । पाशवद्धो मृगः काकेन रक्षितः । काकेनोक्तम् ।

२९.८ वाक्येपु प्रयोगं कुरुत

श्वेतः । श्वेता । श्वेतम् । कष्णः । कृष्णा । कृष्णम् । रक्तम् । रक्ता । रक्तः । पीता । पीतः । पीतम् । मधुरः । मधुरा । मधुरम् । हरितः । हरिता । हरितम् । कटुः । कट्वी । कटु । अम्लः । अम्ला । अम्लम् । शीतलः । शीतला । शीतलम् । उष्णः । उष्णा । उष्णम् । शोभनः । शोभना । शोभनम् । स्थूलः । मनोहरः । कृशः । वुद्धिमान् । साधुः । स्थूला । कृशा । मनोहरा । वुद्धिमती । साध्वी । स्थूलम् । कृशम् । मनोहरम् । वुद्धिमत्

२९.९ यत्तत्पदाभ्यां वाक्यानि संयोजयत ।

१. रामो गच्छति । रामः पुस्तकं धारयति ।
२. काकः गच्छति । तं जनास्ताडयन्ति । तं त्वमपि पश्यसि ।
३. रामो वाणेन वालिनं हतवान् । स तेनैव रावणमपि घातितवान् ।
४. स रामाय पुस्तकं ददाति । रामस्तमेव भर्त्सयति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

५. कृष्णो वृक्षात् फलं चिनोति । सोऽद्य वातेन पातितः ।
६. तस्य नेत्रे काणे स्तः । तस्य नाम नेत्रविक्रमोऽस्ति ।
७. तत्र सरसि मत्स्या न सन्ति । तत्र कमलान्यपि न सन्ति ।
८. सा न जल्पति । सा मध्यदेशादागताऽस्ति ।
९. तत् फलं निस्वादु वर्तते । तत् मह्यं न रोचते ।
१०. तानि कार्याणि मया क्रियन्ते । तानि कार्याणि कर्तुं त्वं न शक्नोसि ।

२९.१० स्वयमेव कथानकं प्रकल्प्य संवादमेकं रचयत ।

२९.११ कर्तृ-कर्म-करणाधिकरणपदान्यन्विष्य लिखत ।

२९.१२ कोष्ठस्थपदान्यनुसृत्य रिक्तस्थानानि पूरयत ।
१. काकः ......अस्ति । स ....अपि विद्यते । (कृष्ण, चपल)
२. रमे .... स्तः । ते......... विद्येते । (सुन्दरी, गुणवती)
३. वालिकाः .... सन्ति । ताः ......विद्यन्ते । (कृश, रुपहीन)
४. स ग्रामः .....अस्ति । तत्र .....वृक्षाः सन्ति । (मनोहर, घन)
५. तत् शिरस्त्रम्....वर्तते परं शाटी ....विद्यते । (श्वेत, रक्त)
६. इमानि फलानि ...वर्तन्ते तानि तु ... सन्ति ।(मधुर, अम्ल)
७. तस्या जलं ....अस्ति किन्तु अस्या जलं ....अस्ति । (शीतलं, उष्ण)
८. वृक्षस्य पत्राणि .... सन्ति, फलानि च ...वर्तन्ते । (हरित्, पीत)
९. ते वाटिके ....स्तः किन्तु तत्र ...... नास्ति । (सुन्दर, जल)
१०. मया .... फलानि खादितानि परं तानि ..... नासन् । (पक्व, स्वादु)

○

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्रिंशत्तमः पाठः

३०.१ निम्नगद्यभागमधीत्य तदनुवर्तिनां प्रश्नानामुत्तराणि लिखत ।

अस्ति मगधदेशे चम्पकवती नामारण्यानी । तस्यां चिरान्महता स्नेहेन मृगकाकौ निवसतः । स च मृगः स्वेच्छया भ्राम्यन् हृष्टपुष्टाङ्गः केनचिच्छृगालेनावलोकितः । तं दृष्ट्वा शृगालोऽचिन्तयत्- आः कथमेतन्मांसं सुललितं भक्षयामि । भवतु, तावद्विश्वासमुत्पादयामि । इत्यालोच्योपसृत्याब्रवीत्- मित्र, कुशलन्ते ? मृगेणोक्तम्- कस्त्वम् ? क्षुद्रबुद्धिनामा जम्बूकोऽहम् । आत्रारण्ये वन्धुहीनो मृतवन्निवसामि । इदानीं त्वां मित्रमासाद्य पुनः सवन्धुर्जीवलोकं प्रविष्टोऽस्मि । साधुना त्वयानुचरेण मया सर्वथा वर्तितव्यम् । मृगेणोक्तम्- एवमस्तु । ततः पश्चादस्तङ्गते सवितरि भगवति मरीचिमालिनि तौ मृगस्य वासभूमिङ्गतौ । तत्र चम्पकवृक्षशाखायां सुबुद्धिनामा काको मृगस्य चिरमित्रं निवसति स्म । तौ दृष्ट्वा काकोऽवदत्-सखे, चित्राङ्ग, कोऽयं द्वितीयः ? मृगो वूते-जम्बूकोऽयम् । अस्मत्सख्यमिच्छन्नागतः । काको वूते- मित्र, अकस्मादागन्तुना सह मैत्री न युक्ता । जम्बूकः सकोपमाह-मृगस्य प्रथमदर्शनदिने भवानपि, अज्ञातकुलशील एव । तत्कथं भवता सहैतस्य स्नेहानुवृत्तिरुत्तरोत्तरं वर्धत एव । यथायं मृगो मम वन्धुस्तथा भवानपि । मृगेणोक्तम्- किमनेनोत्तरोत्तरेण सर्वैरेकत्र विश्रम्भालापैः सुखमनुभवद्भिः स्थीयताम् ।

१. मृगकाकौ कुत्र वसतः ?

२. मृगः कीदृश आसीत् ?

३. मृगं विलोक्य शृगालेन किं विचारितम् ?

४. शृगालेन स्वपरिचयः कथं प्रस्तुतः ?

५. मृगशृगालौ कदा मृगस्य वासस्थानङ्गतौ ?

६. मृगस्य चिरमित्रं कुत्र वसति स्म ?

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

७. जम्बूककाकारण्यानां नामानि कानि ?

८. काकस्य वचनं निशम्य शृगालेन किमुक्तम् ?

९. केन सह मैत्री नोचिता ?

३०.२ निर्धारितपाठान्तर्गतपदानां पर्यायशब्दान् लिखत ।

३०.३ सन्धिविच्छेदं कुरुत ।

नामारण्यानि । चिरान्महता । केनचिच्छृगालेन । शृगालोऽचिन्तयत् । एतन्मांसम् । तावदुत्पादयामि । इत्यालोच्य । आलोच्योपसृत्य । मृगेणोक्तम् । जम्बूकोऽहम् । अत्रारण्ये । मृतवन्निवसामि । प्रविष्टोऽस्मि । त्वयानुचरेण । पश्चादस्तङ्गते । काको मृगस्य । काकोऽवदत् । शील एव । सहैतस्य । स्नेहानुवृत्तिः । इच्छन्नागतः ।

३०.४ विग्रहान् प्रदर्श्य समासनामानि लिखत ।

मगधदेशे । मृगकाकौ । हृष्टपुष्टाङ्गः । क्षुद्रबुद्धिनामा । वन्धुहीनः । सवन्धुः । जीवलोकम् । मरीचिमालिनि । चम्पकवृक्षशाखायाम् । सुवुद्धिनामा । चिरमित्रम् । चित्राङ्गः । अस्मत्सख्यम् । प्रथमदर्शनदिने । अज्ञातकुलशीलः । स्नेहानुवृत्तिः । उत्तरोत्तरम् ।

३०.५ निर्धारितपाठस्य सरलार्थं लिखत ।

३०.६ निम्नपदानि प्रयुज्य वाक्यानि रचयत ।

महान् । महत्तरः । महत्तमः । शुक्लः । शुक्लतरः । शुक्लतमः । पटुः । पटुतरः । पटुतमः । प्रियः । प्रियतरः । प्रियतमः । दीर्घः । दीर्घतरः । दीर्घतमः । दृढः । दृढतरः । दृढतमः । मृदुः । मृदुतरः । मृदृतमः । कृशः । कृशतरः । कृशतमः । वृद्धः । ज्यायान् । ज्येष्ठः । अल्पः । अल्पीयान् । अल्पिष्ठः । वहुः । वहुतरः । वहुतमः । प्रशस्यः । श्रेयान् । श्रेष्ठः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

युवा । यवीयान् । यविष्ठः । स्थूलः । स्थूलतरः । स्थूलतमः । दूरः । दूरतरः । दूरतमः । क्षुद्रः । क्षुद्रतरः । क्षुद्रतमः । अन्तिकः । नेदीयान् । नेदिष्ठः । स्थिरः । स्थेयान् । स्थेष्ठः । पृथुः । प्रथीयान् । प्रथिष्ठः । पापी । पापीयान् । पापिष्ठः ।

३०.७ वाच्यपरिर्वतनं कुरुत ।

१ वने विचरता केनापि शृगालेन हृष्टपुष्टाङ्गो मृगो विलोकितः ।

२. तं विलोक्य तेन जम्बूकेन मृगवधोपायश्चिन्तितः ।

३. ततो मृगमुपसरन् स तं मैत्रीं याचितवान् ।

४. सरलचेतसा तेन मृगेण शृगालस्य प्रस्तावः स्वीकृतः ।

५. उभौ सायं मृगस्य वासभूमिमगच्छताम् ।

६. मृगेणोक्तम्-सर्वैः सुखमनुभवद्भिः स्थीयताम् ।

३०.८ कोष्ठस्थपदान्यनुसृत्य रिक्तस्थानं पूरयत ।

१. रामः केशवात्.......................... (सुन्दर)

२. हिमालयः पर्वतेषु ....(उच्च)

३. इयं वाणी तस्या वचनात् .... (ललित)

४. अर्जुनः कुमारेषु ....(श्रेयान्)

५. अय बालकस्तस्माद्.................. (अल्प)

६. ताभ्य इयं कृतिः .... (प्रशस्य)

७. अयं मत् ....(युवा)

८. इदं वनं वनेषु ....(अन्तिक)

९. हिट्लरः शासकेषु ....(पापिन्)

१०. अयं स्तम्भस्तस्मात् ....(दृढ)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

११. इयं नारी मम .... (प्रिय)

१२. अयं वालकः सर्वेषु .... (कृश)

१३. इदं फलम् तस्मात् .... (कटु)

१४. तत् पुस्तकं सर्वेषु .... (सुन्दर)

१५. मार्जारो जरद्गवात् .... (पटु)

१६. गृध्रः सर्वेषु पक्षिषु ... (तद्र)

१७. गङ्गा स्थानादस्माद् .... (दूर)

१८. भारतं नेपालात् .... (समृद्ध)

१९. नेपालो भूटानदेशात् .... (वृहत्)

२०. भूटानदेशो नेपालात् .... (अल्प)

२१. नेपालस्य जनसंख्या भारतजनसंख्यातः (न्यून)

२२. भारतदेशो लङ्कादेशात् .... (आन्तिक)

२३. कार्यालये कार्याणि गतदिनात्............ (वहु)

२४. पक्षिशावकैः कोलाहलः कृतः ...... (अधिक)

२५. अस्मिन् सत्रे गतसत्रात् छात्राः .... (वहु)

२६. श्यामस्त्वत् .... (चतुर)

२७. केशवः छात्राणां .... (निपुण)

२८. मम हस्तौ तव हस्ताभ्यां .... (दीर्घ)

२९. तानि फलानि तेभ्यः .... (अम्ल)

३०. अहं ....फलं न खादामि । (कटु)

○

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एकत्रिंशत्तमः पाठः

३१. अधस्तनगद्यभागमधीत्य तदनुर्वार्तिनां प्रश्नानामुत्तराणि लिखत ।

एकदा निभृतं शृगालो ब्रूते- सखेऽस्मिन् वनैकदेशे सस्यपूर्णं क्षेत्रमस्ति । तदहं त्वां नीत्वा दर्शयामि । तथा कृते मृगः प्रत्यहं गत्वा सस्यं खादति । अथ क्षेत्रपतिना तद् दृष्ट्वा पाशो योजितः । अनन्तरं पुनरागतो मृगः पाशवद्धोऽचिन्तयत्- "को मामितो मित्रादन्यः कालपाशादिव व्याधपाशात्त्रातुं समर्थः ? अत्रान्तरे जम्वूकस्तत्रागत्याचिन्तयत्- फलितास्तावदस्माकं कपटप्रवन्धेन मनोरथसिद्धिः । एतस्योत्कृत्यमानस्य मांसस्यासृग्लिप्तान्यस्थीनि मयावश्यं प्राप्तव्यानि । तानि वाहुल्येन भोजनानि भविष्यन्ति । मृगस्तं दृष्ट्वोल्लासितो ब्रूते- सखे, छिन्धि तावन्मम वन्धनम् । सत्वरं मां त्रायस्व ।

१. मृगः प्रत्यहं कुत्र गच्छति स्म ?

२ सस्यपूर्णं क्षेत्रं कुत्रासीत् ?

३. मृगः पाशैः कथं वद्धः ?

४. पाशवद्धेन मृगेण किं विचारितम् ?

५. शृगालस्य मनोरथाः कथं फलिताः ?

६. शृगालस्य प्राप्तव्यानि भोजनानि कानि ?

७. शृगालं विलोक्य मृगेण किमुक्तम् ?

३०.२ निर्धारितपाठान्तर्गतपदानां पर्यायशव्दान् लिखत ।

३०.३ सविग्रहं समासनामानि लिखत ।

सस्यपूर्णम् । प्रत्यहम् । क्षेत्रपतिना । कालपाशात् । व्याधपाशात् । कपटप्रवन्धेन । मांसासृग्लिप्तानि ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

३१.४ सन्धिविच्छेदं कुरुत, सूत्राणि च लिखत ।

शृगालो ब्रूते । वद्धोऽचिन्तयत् । को माम् । कालपाशादिव । मित्रादन्यः । आगत्योपस्थितः । अत्रान्तरे । मयावश्यम् । दृष्ट्वोल्लासितः । तावन्मम ।

३१.५ निर्धारितपाठस्य सरलार्थं लिखत ।

३१.६ प्रकृतिप्रत्ययविच्छेदं कुरुत ।

एकदा । नीत्वा । दृष्ट्वा । योजितः । वद्धः । त्रातुम् । उल्लासितः । उत्कृत्यमानः । लिप्तम् । वाहुल्यम् । भोजनम् । वन्धनम् ।

३१.७ वाच्यपरिवर्तनं कुरुत ।

१. अहं त्वां सस्यपूर्णं क्षेत्रं दर्शयामि ।

२. मृगः प्रत्यहं तत्र गत्वा सस्यं खादति ।

३. अस्थीनि मयावश्यं प्राप्यन्ते ।

४. तानि मया भोजनानि क्रियन्ते ।

५. शृगालः पाशवद्धं मृगमपश्यत् ।

३१.८ मृगशृगालयोः संवादमेकं रचयत ।

३१.९ रेखाङ्कितपदानां निर्वचनं कुरुत ।

३१.१० स्वकीयवाक्येषु प्रयोगं कुरुत ।

एकः । द्वौ । त्रयः । चत्वारः । एका । द्वे । तिस्रः । चतस्रः । एकम् । द्वे । त्रीणि । चत्वारि । पञ्च । षट् । सप्त । अष्ट । नव । दश । एकादश । द्वादश । त्रयोदश । चतुर्दश । पञ्चदश । षोडश । सप्तदश । अष्टादश । एकोनविंशतिः । विंशतिः । एकविंशतिः । द्वाविंशतिः । त्रयोविंशतिः । चतुर्विंशतिः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पञ्चविंशतिः । षड्विंशतिः । सप्तविंशतिः । अष्टाविंशतिः । नवविंशतिः । त्रिंशत् ।

३१.१२ कमप्येकं कथानकं प्रकल्प्य सङ्ख्यावाचकशब्दाञ्च प्रयुज्य कथां लिखत ।

○

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

द्वात्रिंशत्तमः पाठः

३२.१ निम्नलिखितगद्यभागमधीत्य तदनुवर्तिनां प्रश्नानामुत्तराणि लिखत ।

ततो जम्बूको मुहुर्मुहुः पाशं विलोक्याचिन्तयत्- 'दृढस्तावदयं बन्धः । ब्रूते च - सखे, स्नायुनिर्मिता एते पाशाः, तदद्य भट्टारकवासरे कथमेतन्मासं दन्तैः स्पृशामि । मित्र, यदि चित्ते नान्यथा मन्यसे तदा प्रभाते यत् त्वया वक्तव्यन्तन्मया कर्तव्यम् । इत्युक्त्वा तत्समीप आत्मानमाच्छाद्य स स्थितः । अनन्तरं स काकः प्रदोषसमये मृगमनागतमवलोक्येतस्ततोऽन्विष्य तथाविधं दृष्ट्वोवाच-सखे, किमेतत् ? मृगेणोक्तम्-अवधीरितसुहद्वाक्यस्य फलमेतत् । अथ प्रभाते क्षेत्रपतिर्लगुडहस्तस्तं प्रदेशमागच्छन् काकेनावलोकितः । तमवलोक्य काकेनोक्तम्- सखे मृग, त्वमात्मानं मृतवत् संदर्श्य वातेनोदरं पूरयित्वा पादान् स्तब्धीकृत्य तिष्ठ । अहं तव चक्षुषी चञ्च्वा विलिखामि । यदाहं शब्दं करोमि तदा त्वमुत्थाय सत्वरं पलायिष्यसे । मृगस्तथैव काकवचनेन स्थितः । ततः क्षेत्रपतिना हर्षोत्फुल्ललोचनेन तथाविधो मृगो विलोकितः । आः स्वयं मृतोऽसि, इत्युक्त्वा स मृगं बन्धनान्मोचयित्वा पाशान् ग्रहीतुं सयत्नोऽभवत् । ततः काकशब्दं श्रुत्वा मृगः सत्वरमुत्थाय पलायितः । तमुद्दिश्य क्षेत्रपतिना क्षिप्तेन लगुडेन श्रृगालो हतः ।

१. पाशबद्धं मृगं विलोक्य शृगालेन किं चिन्तितम् ?

२. कस्य हेतोः मृगः पाशबद्धः संजातः ?

३. मृगस्यानुरोधं निशम्य जम्बूकः किमुक्तवान् ?

४. काकेन कीदृशः क्षेत्रपतिर्विलोकितः ?

५. मृगः पलायितुं कथं समर्थः ?

६. शृगालः केन घातितः ?

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

७. काकेन मृगः कथं रक्षितः ?

८. क्षेत्रपतिना कीदृशो मृगो विलोकितः ?

९. अनया कथया का शिक्षा लभ्यते ?

३२.२ निर्धारितपाठान्तर्गतपदानां पर्यायशब्दान् लिखत ।

३२.३ सविग्रहं समासनामानि लिखत ।

भट्टारकवासरे । अवधीरितसुहृद्वाक्यस्य । लगुडहस्तः । क्षेत्रपतिः । स्तब्धीकृत्य । काकवचनेन । हर्षोत्फुल्ललोचनेन ।

३२.४ सन्धिविच्छेदं विधाय सूत्राणि लिखत ।

विलोक्याचिन्तयत् । जम्बूको मुहुः । तावदयम् । निर्मिता एते । तदद्य । इतस्ततः । ततोऽन्विष्य । दृष्ट्वोवाच । काकेनावलोकितः । वातेनोदरम् । सयत्नोऽभवत् ।

३२.५ सन्धिं विधाय सूत्राणि च लिखत ।

शृगालः + हतः । दृष्ट्वा + उवाच । तत् + मया । वच् + तव्यम् । न + अन्यथा । काकेन + उक्तम् । इति + उक्त्वा । हर्षेण + उत्फुल्लम् । समीपे + आत्मानम् ।

३२.६ निम्नपदानि प्रयुज्य वाक्यानि रचयत ।

एकत्रिंशत् । द्वात्रिंशत् । त्रयस्त्रिंशत् । चतुस्त्रिंशत् । पञ्चत्रिंशत् । षट्त्रिंशत् । सप्तत्रिंशत् । अष्टत्रिंशत् । नवत्रिंशत् । चत्वारिंशत् । एकचत्वारिंशत् । द्विचत्वारिंशत् । त्रिचत्वारिंशत् । चतुश्चत्वारिंशत् । पञ्चचत्वारिंशत् । षट्चत्वारिंशत् । सप्तचत्वारिंशत् । नवचत्वारिंशत् । पञ्चाशत् । एकपञ्चाशत् । द्विपञ्चाशत् । त्रयःपञ्चाशत् । चतुःपञ्चाशत् । पञ्चपञ्चाशत् । षट्पञ्चाशत् । सप्तपञ्चाशत् । अष्टपञ्चाशत् । नवपञ्चाशत् । षष्टिः ।

३२.७ काकमृगयोः संवादमेकं रचयत ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

३२.८ निर्धारितपाठस्य सरलार्थं लिखत ।

३२.९ प्रकृतिप्रत्ययविच्छेदं कुरुत ।

विलोक्य । उक्त्वा । आलोक्य । उत्थाय । ग्रहीतुम् । पूरयित्वा । दृष्ट्वा । उक्तः । अवलोक्य । वन्धनम् । वचनम् । लोचनम् । विलोकितः । श्रुत्वा । उद्दिश्य । हतः । आगच्छन् । वक्तव्यम् । अन्विष्य । आलोक्य । पलायितः । स्थितः । क्षिप्तः । सन्दर्श्य ।

३२.१० रेखाङ्कितपदानां निर्वचनं कुरुत ।

३२.११ परन्तुकिन्तुप्रभृतिभिः पदैर्योजयत ।

१. वालकाः सम्यक् पठन्ति । वालिका न पठन्ति ।

२. वयं पुस्तकं पठामः । ते लेखान् लिखन्ति ।

३. क्षेत्रपतिना लगुडः क्षिप्तः । मृगः पलायितः ।

४. सूर्यः स्वयं प्रकाशते । ग्रहाः न प्रकाशन्ते ।

५. द्वात्रिंशत्खगेपु त्रयो नीलाः । अन्ये कृष्णाः ।

६. विद्वांसः काव्यशास्त्रविनोदेन कालं यापयन्ति । मूढा निद्रया व्यसेन कलहेन वा कालं गमयन्ति

७. अयं वालकः पटुः, स च मन्दधीरस्ति ।

८. अयं काव्यानि सृजति । ते च भावयन्ति ।

९. स सम्यक् क्रीडति । स साधु न लिखति ।

१० पृथ्वी पूर्वदिशं गच्छति । अन्ये ग्रहाः पश्चिमदिशं यान्ति ।

३२.१२ निर्धारितपाठान्तर्गतानि क्रियापदानि, तद्धातवश्च लिख्यन्ताम् ।

○

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्रयस्त्रिंशत्तमः पाठः

३३.१ निम्नगद्यभागमधीत्य तदनुवर्तिनां प्रश्नानामुत्तरं लिखत ।

अस्ति भागिरथीतीरे गृध्रकूटनाम्नि पर्वते महान् पर्कटीवृक्षः । तस्य कोटरे दैवदुर्विपाकाद् गलितनखनयनो जरद्गवनामा गृध्रो निवसति । अथ कृपया तद्वृक्षवासिनः पक्षिणस्तज्जीवनाय स्वाहारात् किञ्चिदुद्धृत्य ददति । तेनासौ जीवति । अथ कदाचिद् दीर्घकर्णनामा मार्जारः पक्षिशावकान् भक्षितुं तत्रागतः । ततस्तमायान्तं दृष्ट्वा पक्षिशावकैर्भयार्तैः कोलाहलः कृतः । तच्छ्रुत्वा जरद्गवेनोक्तम् - कोऽयमायाति ? दीर्घकर्णो गृध्रमालोक्य सभयमाह- हा ! हतोऽस्मि । अधुनास्य सन्निधाने पलायितुमक्षमः । तद्यथा भवितव्यं तद् भवतु तावद् विश्वासमुत्पाद्यास्य समीपे गच्छामि, इत्यालोच्योपसृत्याब्रवीत्- दूरमपसर, नो चेद् हन्तव्योऽसि मया । मार्जारोऽवदत् - श्रूयतां तावदस्मद्वचनम् । ततो यद्यहं वध्यस्तदा हन्तव्यः । एवं विश्वास्य स मार्जारस्तरुकोटरे स्थितः ।

१. पर्कटीवृक्षः कुत्र वर्तते ?

२. जरद्गवः कीदृशोऽस्ति ?

३. गृध्रः कुत्र निवसति ?

४. जरद्गवः कथं जीवति ?

५. मार्जारः किमर्थमागतः ?

६. किमर्थं पक्षिशावकाः कोलाहलं कृतवन्तः ?

७. मार्जारः कस्य हेतोर्जरद्गवमुपसृतवान् ?

८. जरद्गवः कुत्र वसति स्म ?

९. पक्षिशावकाः किमर्थं भयमुपगताः ?

३३.२ निर्धारितपाठान्तर्गतपदानां पर्यायशब्दान् लिखत ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

३३.३ सविग्रहं समासनामानि लिखत ।

भागिरथीतीरे । गृध्रकूटनाम्नि । पर्कटीवृक्षः । दैवदुर्विपाकात् । गलितनखनयनः । जरद्गवनामा । तद्वृक्षवासिनः । तज्जीवनाय । स्वाहाराद् । दीर्घकर्णनामा । पक्षिशावकान् । पक्षिशावकैः । भयार्तैः। दीर्घकर्णः । सभयम् । अस्मद्वचनम् । तरुकोटरे ।

३३.४ सन्धिं विधाय सूत्राणि च लिखत ।

गृध्रः + निवसति । तत् + जीवनाय । स्व + आहारात् । किञ्चित् + उद्धृत्य । तेन + असौ । कः +अयम् । हतः + अस्मि । अधुना + अस्य । तत् + यथा । उत्पाद्य + अस्य । इति + आलोच्य । उपसृत्य+अब्रवीत् । मार्जारः + अहम् । हन्तव्यः + असि । यदि + अहम् । वध्यः + तदा ।

३३.५ प्रकृतिप्रत्ययविच्छेदं कुरुत ।

गलितः । उद्धृत्य । भक्षितुम् । श्रुत्वा । अवलोक्य । उक्तम् । हतः । उत्पाद्य । हन्तव्यः । वध्यः ।

३३.६ वाच्यपरिवर्तनं कुरुत ।

१. पक्षिणो जरद्गवाय स्वाहारादुद्धृतमंशं ददति ।
२. पक्षिशावकैरागच्छन् मार्जारोऽवलोकितः ।
३. मार्जारः गृध्रमपश्यत् ।
४. जरद्गवमुपसर्पता तेन विश्वास उत्पादितः ।
५. ततः स तत्रैवाऽतिष्ठत् ।

३३.७ वाक्यविश्लेषणं कुरुत ।

१. गोदावरीतीरे गृध्रकूटनाम्नि पर्वते स्थितस्य पर्कटीवृक्षस्य कोटरे दैवदुर्विपाकाद् गलितनखनयनो जरद्गवनामा गृध्रो निवसति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

२. तद्वृक्षवासिभिः पक्षिभिः स्वाहारादुद्धृत्य दत्तेनाहारेण स जीवनं यापयति ।

३ अथ कदाचित् पक्षिशावकान् भक्षयितुं तत्रागतं मार्जारं विलोक्य भयार्तैः तत्रस्थैः खगपोतैः कोलाहलः कृतः ।

३३.८ निर्धारितपाठस्य सरलार्थं लिखत ।

३३.९ वाक्येषु प्रयोगं कुरुत ।

एकषष्टिः । द्विषष्टिः । त्रिषष्टिः । चतुष्षष्टिः । पञ्चषष्टिः । षड्षष्टिः । सप्तषष्टिः । अष्टषष्टिः । नवषष्टिः । सप्ततिः ।

३३.१०कमपि कथानकं प्रकल्प्य संवादमेकं रचयत ।

३३.११ रेखाङ्कितपदानां निर्वचनं कुरुत ।

O

Acc 22498 / 22414

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चतुस्त्रिंशत्तमः पाठः

३४.१ निम्नगद्यभागमधीत्य तदनुवर्तिनां प्रश्नानामुत्तराणि लिखत ।

ततो दिनेषु गच्छत्स्वसौ पक्षिशावकानाक्रम्य कोटरमानीय प्रत्यहं खादति । अथ येषामपत्यानि खादितानि, तैः शोकार्तैर्विलपद्भिरितस्ततो जिज्ञासा प्रारब्धा । तत्परिज्ञाय मार्जारः कोटरान्निस्सृत्य वहिः पलायितः । पश्चात् पक्षिभिरितस्ततो निरूपयद्भिस्तत्र तरुकोटरे शावकास्थीनि प्राप्तानि । अनन्तरं त ऊचुः- अनेनैव जरद्गवेनास्माकं शावकाः खादिताः । इति सर्वैः पक्षिभिर्निश्चित्य गृध्रो व्यापादितः ।

१. जरद्गवः प्रत्यहं किं करोति ?

२. खगैः का जिज्ञासा प्रारब्धा ?

३. पक्षिभिः शावकास्थीनि कुत्र प्राप्तानि ?

४. मार्जारः किमर्थं पलायितः ?

५. गृध्रः कथं मृतः ?

६. अनया कथया का शिक्षा लभ्यते ?

३४.२ निर्धारितपाठान्तर्गतपदानां पर्यायशब्दान् लिखत ।

३४.२ सविग्रहं समासनामानि लिखत ।

पक्षिशावकान् । शोकार्तैः । तरुकोटरे । शावकास्थीनि । शोकार्द्रैः । प्रत्यहम् ।

३४.४ प्रकृतिप्रत्ययविच्छेदं कुरुत ।

आक्रम्य । आनीय । खादितम् । विलपन् । प्रारब्धः । परिज्ञाय । निश्चितः । निरूपयन् । खादितुम् । निश्चित्य । व्यापादितः ।

३४.५ निर्धारितपाठस्य सरलार्थं लिखत ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

३४.६ वाक्येषु प्रयोगं कुरुत ।

एकसप्ततिः । द्विसप्ततिः । त्रिसप्ततिः । चतुःसप्ततिः । पञ्चसप्ततिः । षट्सप्ततिः । सप्तसप्ततिः । अष्टसप्ततिः । नवसप्ततिः । अशीतिः । एकाशीतिः । द्व्यशीतिः । त्र्यशीतिः । चतुरशीतिः । पञ्चाशीतिः । षडशीतिः । सप्ताशीतिः । अष्टाशीतिः । नवाशीतिः । नवतिः । एकनवतिः । द्विनवतिः । त्रिनवतिः । चतुर्नवतिः । पञ्चनवति । षण्णवति । सप्तनवतिः । अष्टनवतिः । नवनवतिः । शतम् । एकाधिकशतम् । द्व्यधिकशतम् । द्विशती । त्रिशती । चतुःशती । पञ्चशती । षट्शती । सप्तशती । अष्टशती । नवशती । सहस्रम् । अयुतम् । लक्षम् । नियुतम् । कोटिः । दशकोटिः । अर्बुदम् । दशार्बुदम् । खर्वम् । दशखर्वम् । नीलम् । दशनीलम् । पद्मम् । दशपद्मम् । शङ्खम् । दशशङ्खम् ।

३४.७ कमपि प्रसङ्गमनुसृत्य संख्यावाचकशब्दांञ्च प्रयुज्य स्वाभ्यमनुच्छेदं रचयत ।

३४.८ वाक्यविश्लेषणं कुरुत ।

१. ततो दिनेषु गच्छत्सु मार्जारः पक्षिशावकानाक्रम्य कोटरमानीय प्रत्यहं खादति ।
२. ततोऽपत्यवियोगेन दुःखितैर्विलपद्भिः पक्षिभिः प्रारब्धां जिज्ञासां परिज्ञाय मार्जारस्तरुकोटरान्निस्सृत्य पलायितः ।
३. इतस्ततो निरूपयन्तः पक्षिणस्तरुकोटरे शावकानामस्थीनि प्राप्य गृध्रमेव शावकभक्षकं निश्चित्य तं व्यापादितवन्तः ।

३४.९ वाच्यपरिवर्तनं कुरुत ।

१ प्रत्यहं मार्जारः पक्षिशावकानाक्रमति, खादति च ।
२. दीर्घकर्णेन येषामपत्यानि खादितानि तैः शोकातुरैरितस्ततो जिज्ञासा प्रारब्धा ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

३. अनेनैव जरद्गवेनास्माकं शावकाः खादिता इति निश्चित्य सर्वैः पक्षिभिः गृध्रो व्यापादितः ।

३४.१० सन्धिं विधाय सूत्राणि च लिखत ।

प्रति + अहम् । कोटरात् + निस्सृत्य ते + ऊचुः । अनेन + एव । जरद्गवेन + अस्माकम् । गृध्रः + व्यापादितः । पक्षिभिः + तत्र । शावकान् + आक्रम्य ।

३४.११ रेखाङ्कितपदानां निर्वचनं कुरुत ।

O

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पञ्चत्रिंशत्तमः पाठः

३५.१ अस्ति चम्पकाभिधानायां नगर्यां परिव्राजकावसथः। तत्र चूडाकर्णो नाम परिव्राट् प्रतिवसति। स च भोजनावशिष्टभिक्षान्नसहितं भिक्षापात्रं नागदन्तकेऽवस्थाप्य स्वपिति। अहञ्च तदन्नमुत्प्लुत्य प्रत्यहं भक्षयामि। अनन्तरं तस्य सुहृद् वीणाकर्णो नाम परिव्राजकः समायातः। तेन सह कथाप्रसङ्गावस्थितो मम त्रासार्थं जर्जरवंशखण्डेन चूडाकर्णो भूमिमताडयत्। वीणाकर्ण उवाच-सखे, किमिति मम कथाविरक्तोऽन्यासक्तो भवान्? चूडाकर्णेनोक्तम्-मित्र, नाहं विरक्तः, किन्तु पश्यायं मूषिको ममापकारी सदा पात्रस्थमन्नमुत्प्लुत्य भक्षयति। वीणाकर्णो नागदन्तकं विलोक्याह- कथमेतद् यत्स्वल्पवलोऽपि, एतावद् दूरमुत्पतति? तदत्र केनापि कारणेन भवितव्यम्। क्षणं विचार्य परिव्राजकेनोक्तम्- कारणञ्चात्र धनवाहुल्यमेव भविष्यति। ततः खनित्रमादाय तेन विवरं खनित्वा चिरसञ्चितं मम धनं गृहीतम्। ततः प्रभृति निजशक्तिहीनः सत्त्वोत्साहरहितः स्वाहारमप्युत्पादयितुमक्षमः सत्रासं मन्दमन्दमुपसर्पन् चूडाकर्णेनावलोकितो जर्जरवंशखण्डेन ताडितश्च। ततोऽहं निर्जनवनमागतः।

उपरितनगद्यभागमधीत्य निम्नप्रश्नानामुत्तराणि लिखत।

१. परिव्राजकानां वसतिः कुत्रासीत्?

२. चूडाकर्णः किं कृत्वा अशेत?

३. मूषकः प्रत्यहं किं खादति स्म?

४. चूडाकर्णस्य गृहे कः समागतः?

५. चूडाकर्णः किमर्थं भूमिमताडयत्?

६. वीणाकर्णस्य कथायां कस्य विरक्तिरासीत्?

७. परिव्राजकेन किं कृत्वा मूषकस्य धनं हृतम्?

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

८. चूडाकर्णेन मूपकः केन ताडितः ?

९. धने हृते मूपकस्य का दशा सञ्जाता ?

१०. मूपकः किमर्थं निर्जनवनमागतः ?

३५.२ निर्धारितपाठान्तर्गतपदानां पर्यायशब्दान् लिखत ।

३५.३ सन्धिं विधाय सूत्राणि च लिखत ।

चूडाकर्णः + नाम । नागदन्तके + अवस्थाप्य । अहम् + च । विरक्तः + अन्याशक्तः । चूडाकर्णेन + उक्तम् । मम + अपकारी । विलोक्य + आह । अवलः + अपि । ताडितः +च ।

३५.४ सविग्रहं समासनामानि लिखत ।

चम्पकाभिधानायाम् । परिव्राजकावसथः । भोजनावशिष्ट-भिक्षान्नसहितम् । भिक्षापात्रम् । प्रत्यहम् । कथाप्रसङ्गावस्थितः । जर्जरवंशखण्डेन । कथाविरक्तः । अन्यासक्तः । पात्रस्थम् । अवलः । धनवाहुल्यम् । चिरसञ्चितम् । निजशक्तिहीनः । सत्त्वोत्साहरहितः । निर्जनवनम् ।

३५.५ वाच्यपरिवर्तनं कुरुत ।

१. मूपका उत्पतन्तोऽन्नानि भक्षयन्ति ।

२. चूडाकर्णो जर्जरवंशखण्डेन भूमिमताडयत् ।

३. वीणाकर्णेनान्यकथासक्तश्चूडाकर्ण उक्तः ।

४. अयं मूपिको ममापकारी पात्रस्थमन्नं भक्षयति ।

५. क्षणं विचार्य परिव्राजकेनोक्तम् ।

६. खनित्रमादाय वीणाकर्णेन विवरं खनितम्, धनञ्च गृहीतम् ।

७. ततः शक्तिहीनः सत्त्वोत्साहरहितो मन्दमुपसर्पन् वीणाकर्णे-नावलोकितस्ताडितश्च ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

३५.६ निर्धारितपाठस्य सरलार्थं लिखत ।

३५.७ परस्परं वदतोः परिव्राजकयोः संवादं रचयत ।

३५.८ वाक्येषु प्रयोगं कुरुत ।

प्रथमः । द्वितीयः । तृतीयः । चतुर्थः । पञ्चमः । षष्ठः । सप्तमः । अष्टमः । नवमः । दशमः । एकादशः । द्वादशः । त्रयोदशः । चतुर्दशः । पञ्चदशः । षोडशः । सप्तदशः । अष्टादशः । एकोनविंशतितमः । विंशतितमः । त्रिंशत्तमः । चत्वारिंशत्तमः । पञ्चाशत्तमः । षष्टितमः । सप्ततितमः । अशीतितमः । नवतितमः । शततमः । सहस्रतमः । प्रथमा । प्रथमम् । एकादशी । एकादशम् । विंशतितमी । विंशतितमम् ।

३५.९ प्रकृतिप्रत्ययविच्छेदं कुरुत ।

अवस्थाय । समायातः । अवस्थितः । अपकारी । कारणम् । भवितव्यम् । खनित्रम् । आदाय । खनित्वा । सञ्चितम् । गृहीतम् । हीनः । उपसर्पन् । अवलोकितः । ताडितः । आगतः ।

३५.१० पाठान्तर्गतान्यव्ययपदानि कर्तृकर्मकरणपदानि चान्विष्य लिखत ।

३५.११ निम्नपदानि प्रयुज्य वाक्यानि रचयत ।

प्रतिवसति । उत्प्लुत्य । अवस्थाप्य । पश्य । आदाय । खनित्वा । उत्पादयितुम् । अवलोकितः । ताडितः । विचार्य ।

३५.१२ रेखाङ्कितपदानां निर्वचनं कुरुत ।

३५.१३ कमपि विषयमवलम्ब्य स्वल्पमनुच्छेदं रचयत ।

○

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

षट्त्रिंशत्तमः पाठः

३६.१ निम्नगद्यभागमधीत्य तदनुवर्तिनां प्रश्नानामुत्तराणि लिखत ।

आसीत् कल्याणकटकवास्तव्यो भैरवो नाम व्याधः । स चैकदा मृगमन्विष्यमाणो विन्ध्याटवीं गतवान् । ततस्तेन व्यापादितं मृगमादाय गच्छता घोराकृतिः शूकरो दृष्टः । तेन व्याधेन मृगं भूमौ निधाय शूकरः शरेणाहतः । शूकरेणापि घोरगर्जनं कृत्वा मुष्कदेशे हतः संछिन्नद्रुम इव भूमौ निपपात । तयोस्पादास्फालनेन एकः सर्पोऽपि मृतः । अनन्तरं दीर्घरावो नाम जम्बूकः परिभ्रमन्नाहारार्थी तान् मृतान् मृगव्याधसर्पशूकरानपश्यत्, अचिन्तयच्च- अहो, महद्भोज्यं मे समुपस्थितम् । तद्भवतु एषां मांसैर्मासत्रयं मे सुखेन गमिष्यति । ततः प्रथमबुभुक्षायामिदं निस्वादु कोदण्डलग्नं स्नायुबन्धनं खादामि । इत्युक्त्वा तथा कृते सति छिन्ने स्नायुबन्धने उत्पतितेन धनुषा निर्भिन्नः स दीर्घरावः पञ्चत्वङ्गतः । अत एवोक्तम् - कर्तव्यः सञ्चयो नित्यं कर्तव्यो नातिसञ्चयः ।

१. भैरवो नाम व्याधः कुत्र वसति स्म ?

२. व्याधः किमर्थं विन्ध्याटवीं गतवान् ?

३. शूकरः केन दृष्टः ?

४. व्याधः क इव भूमौ पपात ?

५. दीर्घरावः कथं पञ्चत्वमगच्छत् ?

३६.२ निर्धारितपाठान्तर्गतपदानां पर्यायशब्दान् लिखत ।

३६.३ सन्धिं विधाय सूत्राणि लिखत ।

भैरवः + नाम । ततः + तेन । घोरा + आकृतिः । शूकरः + दृष्टः । द्रुमः + इव । शूकरेण + अपि । सर्पः + अपि ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

परिभ्रमन् + आहारार्थी । इति + उक्त्वा । सम् + चयः । तत् + भवंतु । न + अतिसञ्चयः ।

३६.४ सविग्रहं समासनामानि लिखत ।

कल्याणकटकवास्तव्यः । घोराकृतिः । घनघोरगर्जनम् । मुष्कदेशे । संछिन्नद्रुमः । पदास्फालनेन । मृगव्याधसर्पशूकरान् । महद्भोज्यम् । मासत्रयम् । प्रथमवुभुक्षायाम् । कोदण्डलग्नम् । स्नायुवन्धनम् । अतिसञ्चयः ।

३६.५ निर्धारितपाठस्य सरलार्थं लिखत ।

३६.६ प्रकृतिप्रत्ययविच्छेदं कुरुत ।

वास्तव्यः । अन्विष्यमाणः । गतवान् । व्यापादितवान् । आदाय । दृष्टः । निधाय । आहतः । गर्जनम् । मृतः । परिभ्रमन् । भोज्यम् । उत्पतितः । निर्भिन्नः । कर्तव्यम् । छिन्नः । समुपस्थितः । सञ्चयः ।

३६.७ वाच्यपरिवर्तनं कुरुत ।

१. कल्याणकटकवास्तव्यो भैरवो नाम व्याधो मृगमन्विष्यमाणो विन्ध्याटवीमगच्छत् ।

२. मृगमादाय गच्छता व्याधेन घोराकृतिः शूकरो दृष्टः ।

३. तेन व्याधेन मृगं भूमौ निधाय शूकरः शरेणाहतः ।

४. शूकरेणापि घनघोरगर्जनं कृत्वा मुष्कदेशे हतो व्याधः संछिन्नद्रुम इव भूमावपतत् ।

५. अथ दीर्घरावनामा जम्बूकः परिभ्रमन्नाहारार्थी मृगव्याधसर्पशूकरानपश्यत् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

३६.८ अधोलिखितपदानि प्रयुज्य वाक्यानि रचयत ।

अकस्माद् । अग्रतः । अचिरम् । अजस्रम् । सततम् । अन्तरा । अन्तरेण । अतः । अतीव । अत्र । अथ । अधिकम् । अद्य । अधः । अपरेद्युः । अधुना । अन्यत्र । अन्यथा । अभितः । इतः । इत्थम् । इदानीम् । कदा । केवलम् । झटिति । तर्हि । तावत् । तूष्णीम् । नक्तम् । निकषा । नीचैः । परेद्युः । पूर्वेद्युः । पृथक् । प्रतिदिनं । प्रत्युत । प्रसह्य । प्राक् । प्रातः । प्रायः । वहुधा । भृशम् । मृषा । यदा । युगपत् । विना । वृथा । इव ।

३६.९ विशेषणपदान्यन्विष्य लिखत ।

३६.१० कमप्येकं विपयमवलम्ब्य मनोवादं रचयत ।

३६.११ रेखाङ्कितपदानां निर्वचनं कुरुत ।

○

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सप्तत्रिंशत्तमः पाठः

३७.१ निम्नलिखितगद्यभागमधीत्य तदनुवर्तिनां प्रश्नानामुत्तराणि लिखत ।

अस्ति ब्रह्मारण्ये कर्पूरतिलको नाम हस्ती । तमवलोक्य सर्वे शृगालाश्चिन्तयन्ति स्म- यद्ययं केनाप्युपायेन म्रियते तदास्माकमेतद्देहेन मासचतुष्टयस्य भोजनं भविष्यति । तत्रैकेन वृद्धशृगालेन प्रतिज्ञातम्-मया बुद्धिप्रभावादस्य मरणं साधयितव्यम् । अनन्तरं स वञ्चकः कर्पूरतिलकसमीपं गत्वा साष्टाङ्गपातं प्रणम्योवाच-देव, दृष्टिप्रसादं कुरु । हस्ती ब्रूते- कस्त्वम् ? कुतः समायातः ? सोऽवदत्-जम्बूकोऽहम् । सर्वैर्वनवासिभिः पशुभिर्मिलित्वा भवत्सकाशं प्रस्थापितः । तदत्राटवीराज्येऽभिषेक्तुं भवान् सर्वस्वामिगुणोपेतो निरूपितः । तद् यथा लग्नवेला न विचलति तथा कृत्वा सत्वरमागम्यतां देवेन इत्युक्त्वोत्थाय चलितः । ततोऽसौ राज्यलोभाकृष्टः कर्पूरतिलकः शृगालवर्त्मना धावन् महापङ्के निमग्नः । ततस्तेन हस्तिनोक्तम्-सखे शृगाल, किमधुना विधेयम् ? पङ्के निपतितोऽहं म्रिये । परावृत्य पश्य । शृगालेन विहस्योक्तम्- देव, मम पुच्छकावलम्बनं कृत्वोत्तिष्ठ । यन्मद्विधस्य वचसि त्वया प्रत्ययः कृतस्तदनुभूयतामशरणं दुःखम् । ततो महापङ्के निमग्नो हस्ती शृगालैर्भक्षितः ।

१. कर्पूरतिलकः कुत्र वर्तते ?

२. हस्तिनं विलोक्य शृगालाः किमचिन्तयन् ?

३. वृद्धशृगालः किं प्रतिज्ञातवान् ?

४. कर्पूरतिलकः पङ्के कथं निमग्नः ?

५. हस्ती शृगालं किमुक्तवान् ?

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

६. शृगालेन हस्तिवचनं निशम्य किमुत्तरितम् ?

३७.२ निर्धारितपाठान्तर्गतपदानां पर्यायशब्दान् लिखत ।

३७.३ सन्धिं विधाय सूत्राणि च लिखत ।

कर्पूरतिलकः + नाम । यदि + अयम् । केन + अपि । तदा + अस्माकम् । तत्र + एकेन । प्रणम्य + उवाच । कः + त्वम् । सः + अवदत् । जम्बूकः + अवदत् । राज्ये + अभिषेक्तुम् । उक्त्वा + उत्थाय । ततः + असौ । निपतितः + अहम् । विहस्य + उक्तम् । कृत्वा + उत्तिष्ठ । कृतम् + तत् । निमग्नः + हस्ती ।

३७.४ सविग्रहं समासनामानि लिखत ।

मासचतुष्टयस्य । स्वेच्छया । वृद्धशृगालेन । बुद्धिप्रभावात् । कर्पूरतिलकसमीपम् । साष्टाङ्गपातम् । वनवासिभिः । भवत्सकाशम् । अटवीराज्ये । सर्वस्वामिगुणोपेतः । लग्नवेला । राज्यलोभाकृष्टः । शृगालवर्त्मना । मद्विधस्य । महापङ्के ।

३७.५ प्रकृतिप्रत्ययविच्छेदं कुरुत ।

हस्ती । अवलोक्य । भोजनम् । प्रतिज्ञातम् । मरणम् । साधयितव्यम् । गत्वा । प्रणम्य । मिलित्वा । प्रस्थापितः । अभिषेक्तुम् । उपेतः । निरूपितः । उक्त्वा । उत्थाय । चलितः । आकृष्टः । धावन् । निमग्नः । विधेयम् । निपतितः । परावृत्य । विहस्य । उक्तम् । कृत्वा । शरणम् । भक्षितः ।

३७.६ वाच्यपरिवर्तनं कुरुत ।

१. शृगालैः कर्पूरतिलको विलोकितः ।

२. हस्तिनं विलोक्य केनापि शृगालेन तद्वधोपायश्चिन्तितः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

३. सर्वे वनवासिनस्तं शृगालं हस्तिसमीपे प्रेषितवन्तः ।

४. भवान् सत्वरमागच्छतु ।

५. लोभाकृष्टो हस्ती शृगालवर्त्मना धावन् पङ्केऽपतत् ।

६. महापङ्के निमग्नः कर्पूरतिलकः शृगालैर्भक्षितः ।

३७.७. वाक्यसंश्लेषणं कुरुत ।

१. वह्मारण्ये हस्ती अस्ति । तस्य नाम कर्पूरतिलको वर्तते । स शृगालैर्विलोकितः । ततस्तेऽचिन्तयन् । तस्य देहेन मासचतुष्टयस्य भोजनं भविष्यति ।

२. शृगालेष्वेको वृद्धः शृगाल आसीत् । स च हस्तिवधोपायमचिन्तयत् । ततः स हस्तिसकाशं गतवान् । स च तं प्रणतवान् । स तमकथयत् ।

३. भवान् अटवीराज्येऽभिषेक्तुं योग्योऽस्ति । त्वयि संर्वे गुणाः सन्ति । अतो भवान् सत्वरमागच्छतु ।

४. ततो हस्ती लोभाकृष्टोऽभवत् । शृगालोऽधावत् । मार्गे महापङ्कमासीत् । तेनैव मार्गेण हस्ती चागच्छत् । तत्र स निमग्नः । तं सर्वे शृगाला भक्षितवन्तः ।

३७.८ वाक्यविश्लेषणं कुरुत ।

सर्वे वनौकसो राज्यलोभाकृष्टं शृगालवर्त्मना धावन्तं कर्पूरतिलकनामानं हस्तिनं महापङ्के निपतितं प्राप्य सहर्षं भक्षितवन्तः ।

३७.९. वाक्येषु प्रयोगं कुरुत ।

शश्वत् । शनैः । सर्वदा । सहसा । साकम् । समीपम् । सम्यक् । सर्वत्र । सदा । स्वयम् । साक्षात् । श्वः । किन्तु । परन्तु । अथवा । यदि । तर्हि । यावत् । तावत् । धिक् । हन्त । हा ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

३७.१० निर्धारितपाठान्तर्गतानि विशेषणपदानि क्रियाविशेषणनि चान्विष्य लिखत ।

३७.११ कर्मवाच्यस्य प्रयोगं विधाय दशभिर्वाक्यैर्हिमालयं वर्णयत ।

३७.१२ कमपि विषयमवलम्ब्य स्वल्पं मनोवादं रचयत ।

३७.१३ रेखाङ्कितपदानां निर्वचनं कुरुत ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अष्टात्रिंशत्तमः पाठः

३८.१ निम्नपद्यानि सस्वरं पठत ।

पद्यं चतुष्पदि तच्च वृत्तं जातिरिति द्विधा ।
वृत्तमक्षरसंख्यातं जातिर्मात्राकृता भवेत् ॥
सममर्धसमं वृत्तं विषमञ्चेति तत् त्रिधा ।
समं समचतुष्पादं भवत्यर्धसमं पुनः ॥
आदिस्तृतीयवद् यस्य पादस्तूर्यो द्वितीयवत् ।
भिन्नचिह्नचतुष्पादं विषमं परिकीर्तितम् ॥
एकमात्रो भवेद् ह्रस्वो द्विमात्रो दीर्घ उच्यते ।
वर्णसंयोगपूर्वश्च तथा पादान्तगोऽपि वा ।
सानुस्वारश्च दीर्घश्च विसर्गी च गुरुर्भवेत् ॥
आदिमध्यावसानेषु भजसा यान्ति गौरवम् ।
यरता लाघवं यान्ति मनौ तु गुरुलाघवम् ॥
यतिर्जिह्वेष्टविश्रामस्थानं कविभिरुच्यते ।
सा विच्छेदविरामाद्यैः पदैर्वाच्या निजेच्छया ॥
अपादः पदसन्तानो गद्यं तत्तु त्रिधा मतम् ।
चूर्णिकोत्कलिकाप्रायवृत्तगन्धिप्रभेदतः ॥
अकठोराक्षरं स्वल्पसमासं चूर्णकं विदुः ।
तत्तु वैदर्भरीतिस्थं गद्यं हृद्यतरं भवेत् ॥
भवेदुत्कलिकाप्रायं समासाढ्यं दृढाक्षरम् ।
वृत्तैकदेशसंवन्धात् वृत्तगन्धि पुनः स्मृतम् ॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

३८.२ निम्नप्रश्नानामुत्तराणि लिखत ।

१. पद्यस्य किं लक्षणम् ? के च तद्भेदाः ?

२. जातिवृत्तयोर्लक्षणे के ?

३. वृत्तस्य कति भेदाः, कानि च तेषां लक्षणानि ?

४. के वर्णाः गुरवः, के च लघवः ?

५. कति गणाः, के च ते ? कानि च तेषां लक्षणानि ?

६. गद्यस्य किं लक्षणम् ? के च तद्भेदाः ? किञ्च तेषां स्वरूपम् ?

८. भजसाः कुत्र गौरवं यान्ति ?

९. यरताः कुत्र लाघवं प्राप्नुवन्ति ?

१०. यतेर्लक्षणं किम् ? के च तद्वाचका अन्ये शब्दाः ?

११. ह्रस्वस्य दीर्घस्य च किं स्वरुपम् ?

३८.३ गणसङ्केतान् लिखत ।

भं	( )	य	( )	म	( )
ज	( )	र	( )	न	( )
स	( )	त	( )		

३८.३ परस्परं मेलयत

(क)	(ख)
भ	सर्वलघुः (।।।)
ज	सर्वगुरुः (ऽऽऽ)
स	आदिगुरुः (ऽ।।)
य	मध्यगुरुः (।ऽ।)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

	अन्तगुरुः (IIS)
त	आदिलघुः (ISS)
म	मध्यलघुः (SIS)
न	अन्त्यलघुः (SSI)

३८.४ निम्नगणानां प्रत्येकं विंशतिशब्दांन् लिखत ।

भगणः । जगणः । सगणः । यगणः । रगणः ।

तगणः । मगणः । नगणः ।

O

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एकोनचत्वारिंशत्तमः पाठः

३९.१ निम्नपद्यानि सस्वरं पठत ।

यस्याः पादे प्रथमे द्वादशमात्रास्तथा तृतीयेऽपि ।
अष्टादश द्वितीये चतुर्थके पञ्चदश सार्या ॥

X X X X

अज्ञः सुखमाराध्यः सुखतरमाराध्यते विशेषज्ञः ।
ज्ञानलवदुर्विदग्धं ब्रह्मापि नरं न रञ्जयति । ॥१॥
दानं भोगो नाशस्तिस्रो गतयो भवन्ति वित्तस्य ।
यो न ददाति न भुङ्क्ते तस्य तृतीया गतिर्भवति ॥२॥
अप्रियवचनदरिद्रैः प्रियवचनाढ्यैः स्वदारपरितुष्टैः ।
परपरिवादनिवृत्तैः क्वचित् क्वचिन्मण्डिता वसुधा ॥३॥
यदचेतनोऽपि पादैः स्पृष्टः प्रज्वलति सवितुरिनकान्तः ।
तत्तेजस्वी पुरुषः परकृतनिकृतिं कथं सहते ॥४॥
सिहः शिशुरपि निपतति मदमलिनकपोलभित्तिपु गजेषु ।
प्रकृतिरियं सत्त्ववतां न खलु वयस्तेजसो हेतुः ॥५॥

३९.२ निम्नप्रश्नानामुत्तराणि लिखत ।

१. एषु प्रतिपादं काः का मात्राः सन्ति प्रयुक्ताः ?

२. इमानि पद्यानि कस्य छन्दस उदाहरणानि ? कथञ्च तेषु लक्षणसङ्गतिः ?

३. आर्याछन्दसो लक्षणं विलिख्योदाहरणे सङ्गमयत ।

४. आर्याछन्दसः प्रथमे, द्वितीये, तृतीये, चतुर्थे च पादे कतिमात्रा भवन्ति ?

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

३९.३ निम्नप्रश्नाः समाधेयाः ।

१. ब्रह्मा कं रञ्जयितुं न शक्नोति ?

२. वित्तस्य कति गतयो भवन्ति ?

३. वसुधा क्वचिदेव कैर्मण्डिता भवति ?

४. तेजस्वी किं न सहते, कश्चात्र दृष्टान्तः ?

५. सत्त्ववतां प्रकृतिः का ? तेजसो हेतुश्च कः ?

६. कस्य तृतीया गतिर्भवति ?

३९.४ सविग्रहं समासनामानि लिखत ।

अज्ञः । विशेषज्ञः । ज्ञानलवदुर्विदग्धम् । अप्रियवचनदरिद्रैः । प्रियवचनाढ्यैः । स्वदारपरितुष्टैः । परपरिवादनिवृत्तैः । अचेतनः । परकृतनिकृतिम् । मदमलिनकपोलभित्तिषु । सत्त्ववताम् ।

३९.५ निर्धारितपाठान्तर्गतपद्यानां सरलार्थं लिखत ।

३९.६ उक्तपद्यानामन्वयं लिखत ।

३९.७ निर्धारितपद्यानां व्याख्यानङ्कुरुत ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चत्वारिंशत्तमः पाठः

४०.१ निम्नपद्यानि सस्वरं पठत ।

पञ्चमं लघु सर्वत्र सप्तमं द्विचतुर्थयोः ।
षष्ठं गुरुर्विजानीयात् शेषेषु नियमो नहि ॥
X X X X X
दुष्टा भार्या शठं मित्रं भृत्यश्चोत्तरदायकः ।
ससर्पे च गृहे वासो मृत्युरेव न संशयः ॥१॥
शैले शैले न माणिक्यं मौक्तिकं न गजे गजे ॥
साधवो नहि सर्वत्र चन्दनं न वने वने ॥२॥
अधमा धनमिच्छन्ति धनं मानञ्च मध्यमाः ॥
उत्तमा मानमिच्छन्ति मानो हि महतां धनम् ॥३॥
रङ्कः करोति राजानं राजानं रङ्कमेव च ॥
धनिनं निर्धनञ्चैव निर्धनं धनिनं विधिः ॥४॥
क्षीयन्ते सर्वदानानि यज्ञहोमवलिक्रियाः ।
न क्षीयते पात्रदानमभयं सर्वदेहिनाम् ॥५॥

४०.२ निम्नप्रश्नाः समाधेयाः ।

१. के मृत्युदायकाः ?
२. प्रतिवनं किं न प्राप्यते ?
३. के धनमिच्छन्ति ?
४. के मानधने वाञ्छन्ति ?
५. अधमाः किमिच्छन्ति ?
६. महतां धनं किमस्ति ?
७. कानि क्षीयन्ते ? किञ्चाक्षय्यम् ?

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

८. इमानि पद्यानि कस्य छन्दस उदाहरणानि ?

४०.३ पाठान्तर्गतपदानां पर्यायशव्दान् लिखत ।

४०.४ सविग्रहं समासनामानि लिखत ।

उत्तरदायकः । ससर्पे । सर्वदानानि । यज्ञहोमवलिक्रियाः । पात्रदानम् । अभयम् । सर्वदेहिनाम् ।

४०.५ पाठान्तर्गतपद्यानां सान्वयं व्याख्यां कुरुत

४०.६ कर्तृकर्मसंवन्धाधिकरणपदान्यन्विष्य लिखत ।

४०.७ आशयं प्रकाशयत- "मानो हि महतां धनम् ।"

४०.८ सन्धिं विधाय सूत्राणि च लिखत ।

मृत्यु + च । मानम् + च । मानः + हि । साधवः + नहि । निर्धनम् + च । च + एव । अधमाः + धनम् । उत्तमाः + मानम् । मृत्युः + एव ।

४०.९ अनुष्टुप्छन्दसो लक्षणं विलिख्योदाहरणे संगमयत ।

४०.१० प्रकृतिप्रत्ययविच्छेदं कुरुत ।

दुष्टः । सर्वत्र । माणिक्यम् । धनी । दानम् ।

४०.११ सविग्रहं समासनामानि लिखत ।

सर्वदानानि । यज्ञहोमवलिक्रियाः । पात्रदानम् । अभयम् । सर्वदेहिनाम् ।

४०.१२ वाच्यपरिवर्तनं कुरुत ।

१. अधमा धनमिच्छन्ति ।

२. विधिना राजानो रङ्काः क्रियन्ते ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

३. मध्यमा मानधने वाञ्छन्ति ।

४. उत्तमैर्मानः काङ्क्ष्यते ।

६. साधवः सर्वत्र न तिष्ठन्ति ।

४०.१३ वाक्येषु प्रयोगं कुरुत ।

जिज्ञासते । जिघृक्षति । लिप्सते । विवक्षति । जिज्ञासति । धित्सति । दिदृक्षते । पिपासति । विजिगीषते । पिपृच्छिषति । जिघत्सति । ईप्सति । जिहीर्षति । तितीर्षति । जिजीविषति । दिधक्षति । विभीषते । सिसृक्षति । सुषुप्सति । पिपठिषति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एकचत्वारिंशत्तमः पाठः

४१.१ निम्नपद्यानि सस्वरं पठत ।

अजरामरवत्प्राज्ञो विद्यामर्थञ्च चिन्तयत् ।
गृहीत इव केशेषु मृत्युना धर्ममाचरेत् ॥१॥
विद्या ददाति विनयं विनयाद् याति पात्रताम् ।
पात्रत्वाद् धनमाप्नोति धनाद् धर्मस्ततः सुखम् ॥२॥
यौवनं धनसंपत्तिः प्रभुत्वमविवेकिता ।
एकैकमप्यनर्थाय किमु यत्र चतुष्टयम् ॥३॥
पुण्यतीर्थे कृतं येन तपः क्वाप्यतिदुष्करम् ।
तस्य पुत्रो भवेद् वश्यः समृद्धो धार्मिकः सुधीः ॥४॥
को धन्यो वहुभिः पुत्रैः कुशूलापूरणाढकैः ।
वरमेकः कुलालम्वी यत्र विश्रूयते पिता ॥५॥
ऋणकर्ता पिता शत्रुर्माता च व्यभिचारिणी ।
भार्या रूपवती शत्रुः पुत्रः शत्रुरपण्डितः ॥६॥
यथा ह्येकेन चक्रेण न रथस्य गतिर्भवेत् ।
एवं पुरुषकारेण विना दैवं न सिध्यति ॥७॥
काकतालीयवत्प्राप्तं दृष्ट्वापि निधिमग्रतः ।
न स्वयं दैवमादत्ते पुरुषार्थमपेक्षते ॥८॥
मूर्खोऽपि शोभते तावत् सभायां वस्त्रवेष्टितः ।
तावच्च शोभते मूर्खो यावत् किञ्चिन्न भाषते ॥९॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

माता शत्रुः पिता वैरी येन वालो न पाठितः ।
न शोभते सभामध्ये हंसमध्ये वको यथा ॥१०॥

४१.२ निम्नप्रश्नामुत्तराणि लिखत ।

१. विद्यया कथं सुखं लभ्यते ?

२. अनर्थकारिणः के सन्ति ?

३. कस्य पुत्रः सुधीर्वश्यो धार्मिकश्च भवति ?

४. केन पिता विश्रूयते ?

५ दैवपुरुषार्थयोः केन कार्यं सिध्यति ?

६. वस्त्रवेष्टितो मूर्खः कियत्कालं शोभते ?

७. कीदृशी माता शत्रुः, कीदृक् च पिता वैरी ?

८. मूर्खः सभायां क इव न शोभते ?

४१.३ निर्धारितपाठान्तर्गतपद्यानामन्वयं विलिख्य पर्यायशब्दान् लिखत ।

४१.४ सविग्रहं समासनामानि लिखत ।

अजरामरवत् । अनर्थाय । पुण्यतीर्थे । अतिदुष्करम् । कुशूलापूरणाढकैः । कुलालम्वी । काकतालीयवत् । वस्त्रवेष्टितः । सभामध्ये । हंसमध्ये ।

४१.५ सन्धिं विधाय सूत्रणि लिखत ।

गृहीतः + इव । एक + एकम् । अपि + अनर्थाय । क्व + अपि । अपि +अति । हि + एकेन । गतिः + भवेत् । शत्रुः + अपण्डितः । दृष्ट्वा + अपि । मूर्खः + अपि । तावत् + च । वकः + यथा ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

४१.६ प्रकृतिप्रत्ययविच्छेदं कुरुत ।

पात्रत्वम् । यौवनम् । चतुष्टयम् । प्रभुत्वम् । अविवेकिता । कृतम् । गतिः । दृष्ट्वा । अग्रतः । पाठितः । गृहीतः । धार्मिकः । पण्डितः । प्राप्तः ।

४१.७ पाठान्तर्गतपद्यानां सरलार्थं लिखत ।

४१.८ इमानि पद्यानि कस्य छन्दस उदाहरणानि ? सलक्षणं प्रकाशयत ?

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

द्विचत्वारिंशत्तमः पाठः

४२.१ निम्नपद्यानि सस्वरं पठत ।

काव्यशास्त्रविनोदेन कालो गच्छति धीमताम् ।
व्यसनेन च मूर्खाणां निद्रया कलहेन वा ॥१॥

इज्याध्ययनदानानि तपः सत्यं धृतिः क्षमा ।
अलोभ इति मार्गोऽयं धर्मस्याष्टविधः स्मृतः ॥२॥

दरिद्रान् भर कौन्तेय मा प्रयच्छेश्वरे धनम् ।
व्याधितस्यौषधं पथ्यं निरुजस्य किमौषधैः ॥३॥

नदीनां शस्त्रपाणिनां नखिनां शृङ्गिणान्तथा ।
विश्वासो नैव कर्तव्यः स्त्रीषु राजकुलेषु च ॥४॥

आपदर्थे धनं रक्षेद् दारान् रक्षेद् धनैरपि ।
आत्मानं सततं रक्षेद् दारैरपि धनैरपि ॥५॥

निर्गुणेष्वपि सत्त्वेषु दयां कुर्वन्ति साधवः ।
न हि संहरते ज्योत्स्नां चन्द्रश्चाण्डालवेश्मनः ॥६॥

न कश्चित् कस्यचिन्मित्रं न कश्चित् कस्यचिद्रिपुः ।
व्यवहारेण मित्राणि जायन्ते रिपवस्तथा ॥७॥

४२.२ अधोलिखितप्रश्नामुत्तराणि लिखत ।

१. धीमतां मूर्खाणाञ्च कालः कथं गच्छति ?
२. धर्मस्याष्टौ मार्गाः के सन्ति ?
३. कस्मै धनं न देयम् ?

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

४१.६ प्रकृतिप्रत्ययविच्छेदं कुरुत ।

पात्रत्वम् । यौवनम् । चतुष्टयम् । प्रमुत्वम् । अविवेकिता । कृतम् । गतिः । दृष्ट्वा । अग्रतः । पाठितः । गृहीतः । धार्मिकः । पण्डितः । प्राप्तः ।

४१.७ पाठान्तर्गतपद्यानां सरलार्थं लिखत ।

४१.८ इमानि पद्यानि कस्य छन्दस उदाहरणानि ? सलक्षणं प्रकाशयत ?

O

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

द्विचत्वारिंशत्तमः पाठः

४२.१ निम्नपद्यानि सस्वरं पठत ।

काव्यशास्त्रविनोदेन कालो गच्छति धीमताम् ।
व्यसनेन च मूर्खाणां निद्रया कलहेन वा ॥१॥

इज्याध्ययनदानानि तपः सत्यं धृतिः क्षमा ।
अलोभ इति मार्गोऽयं धर्मस्याष्टविधः स्मृतः ॥२॥

दरिद्रान् भर कौन्तेय मा प्रयच्छेश्वरे धनम् ।
व्याधितस्यौषधं पथ्यं निरुजस्य किमौषधैः ॥३॥

नदीनां शस्त्रपाणिनां नखिनां शृङ्गिणान्तथा ।
विश्वासो नैव कर्तव्यः स्त्रीषु राजकुलेषु च ॥४॥

आपदर्थे धनं रक्षेद् दारान् रक्षेद् धनैरपि ।
आत्मानं सततं रक्षेद् दारैरपि धनैरपि ॥५॥

निर्गुणेष्वपि सत्त्वेषु दयां कुर्वन्ति साधवः ।
न हि संहरते ज्योत्स्नां चन्द्रश्चाण्डालवेश्मनः ॥६॥

न कश्चित् कस्यचिन्मित्रं न कश्चित् कस्यचिद्रिपुः ।
व्यवहारेण मित्राणि जायन्ते रिपवस्तथा ॥७॥

४२.२ अधोलिखितप्रश्नामुत्तराणि लिखत ।

१. धीमतां मूर्खाणाञ्च कालः कथं गच्छति ?
२. धर्मस्याष्टौ मार्गाः के सन्ति ?
३. कस्मै धनं न देयम् ?

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

४. औषधं कस्य पथ्यं भवति ?

५. केषां विश्वासो न कर्तव्यः ?

६. किमर्थं धनं रक्षेत् ?

७. निर्गुणेषु प्राणिषु के दयां कुर्वन्ति ?

८. मित्राणि रिपवश्च कथं जायन्ते ?

४२.३ पाठान्तर्गतपद्यानां सान्वयं पर्यायशब्दान् लिखत ।

४२.४ निर्धारितपद्यानां सरलार्थं लिखत ।

४२.५ सविग्रहं समासनामानि लिखत ।

काव्यशास्त्रविनोदेन । इज्याध्ययनदानानि । अष्टविधः । शस्त्रपाणिनाम् । निर्गुणेषु । चाण्डालवेश्मनः ।

४२.६ सन्धिं विधाय सूत्राणि च लिखत ।

कालः + गच्छति । अलोभः + इति । मार्गः + अयम् । धर्मस्य + अष्टविधः । प्रयच्छ + ईश्वरे । निर्गुणेषु + अपि । दारैः + अपि । रिपवः + तथा । विश्वासः + नैव । व्याधितस्य + औषधम् ।

४२.७ प्रकृतिप्रत्ययविच्छेदं कुरुत ।

धीमान् । दानम् । व्याधितम् । अध्ययनम् । कौन्तेयः ।

४२.८ इमानि पद्यानि कस्मिन् छन्दसि लिखितानि सन्ति ? किञ्च तस्य लक्षणम् ? सोदाहरणं प्रकाशयत ।

४२.९ वाक्येषु प्रयोगं कुरुत ।

पलायते । प्रार्थयते । अभ्यर्थयते । अध्यास्ते । अवेहि । प्रत्येति । उदेति । उपैति । अभ्येति । अन्वेति । अपैति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अपेक्षते । परीक्षते । प्रतीक्षते । निरीक्षते । अवेक्षते । अनुकरोति । अपकरोति । निराकरोति । आक्रमति । उपक्रमते । परिक्रामति । उत्क्षिपति । अनुगच्छति । अवगच्छति । प्रत्यागच्छति । निर्गच्छति । संगच्छते । संचरन्ते । प्रचरति । उपचीयते । अपचीयते ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्रिचत्वारिंशत्तमः पाठः

४३.१ निम्नपद्यानि सस्वरं पठत ।

यदशक्यं न तच्छक्यं यच्छक्यं शक्यमेव तत् ।
नोदके शकटं याति न च नौर्गच्छति स्थले ॥१॥
अयं निजः परो वेति गंणना लघुचेतसाम् ।
उदारचरितानान्तु वसुधैव कुटुम्बकम् ॥२॥
दुर्जनः परिहर्तव्यो विद्ययालङ्कृतोऽपि सन् ।
मणिना भूषितः सर्पः किमसौ न भयङ्करः ॥३॥
मनस्यन्यद् वचस्यन्यत् कर्मण्यन्यद् दुरात्मनाम्।
मनस्येकं वचस्येकं कर्मण्येकं महात्मनाम् ॥४॥
परोपदेशे पाण्डित्यं सर्वेषां सुकरं नृणाम् ।
धर्मे स्वीयमनुष्ठानं कस्यचित्तु महात्मनः ॥५॥
यस्यार्थास्तस्य मित्राणि यस्यार्थास्तस्य बान्धवाः ।
यस्यार्थाः स पुमान् लोके यस्यार्थाः स हि पण्डितः ॥६॥
तेनाधीतं श्रुतं तेन तेन सर्वमनुष्ठितम् ।
येनाशाः पृष्ठतः कृत्वा नैराश्यमवलम्बितम् ॥७॥
वृत्यर्थं नातिचेष्टेत सा हि धात्रैव निर्मिताः ।
गर्भादुत्पतिते जन्तौ मातुः प्रसवतः स्तनौ ॥८॥

४३.२ अधोलिखितप्रश्नानामुत्तराणि लिखत ।

१. शक्यम् किम् ? किञ्चाशक्यम् ?

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

२. अयं निजः परो वेति चिन्तकाः के ?

३. वसुधैव केषां कुटुम्बकं भवति ?

४. दुर्जनः क इव परिहर्तव्यः ?

५. दुरात्मनां महात्मनाञ्च लक्षणानि कानि ?

६. जनानां किं सुकरम् ? किञ्च काठिन्यम् ?

७. अर्थस्य किं महत्त्वमस्ति ?

८. वृत्यर्थं नातिचेष्टेत इति यदुक्तन्तस्य कारणं किम् ?

४३.३ इमानि पद्यानि कस्य छन्दस उदाहरणानि ?

किञ्च तस्य लक्षणम् ? स्फुटं प्रकाशत ।

४३.४ सन्धिं विधाय सूत्राणि च लिखत ।

यत् +अशक्यम् । तत् + शक्यम् । यत् + शक्यम् । न+ उदके । वा + इति । उदारचरितानाम् + तु । वसुधा + एव । विद्यया + अलङ्कृतः । अलङ्कृतः + अपि । मनसि + अन्यत् । वचसि + एकम् । कर्मणि + एकम् । अर्थाः + तस्य । तेन + अधीतम् । वृत्ति + अर्थम् । न + अति । धात्रा + एव । गर्भात् + उत्पतिते ।

४३.५ सविग्रहं समासनामानि लिखत ।

लघुचेतसाम् । उदारचरितानाम् । महात्मनाम् । परोपदेशे । दुरात्मनाम् ।

४३.६ निर्धारितपद्यान्तर्गतपदानां दण्डान्वयं विधाय पर्यायशब्दान् लिखत ।

४३.७ निर्धारितपद्यानां सरलार्थं लिखित ।

४३.८ प्रकृतिप्रत्ययविच्छेदं कुरुत ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शक्यम् । परिहर्तव्यः । अलङ्कृतः । पाण्डित्यम् । अनुष्ठानम् । अधीतम् । अनुष्ठितम् । श्रुतम् । कृत्वा । पृष्टतः । निर्मितः । नैराश्यम् । अवलम्बितम् । उत्पतितम् । पण्डितः । सुकरम् ।

४३.९ वाक्येषु प्रयोगं कुरुत ।

अनुनयति । अभिनयति । आनयति । अपनयते । परिणयति । प्रणयति । उपनयति । व्यपनयति । उन्नयते । निर्णयति । आपतति । उत्पतति । प्रणियतति । विनिमयते । उत्पद्यते । संभवति । निमन्त्रयते । विरमति । आरमति । अपलपति । प्रलपति । विलपति । संलपति । प्रतिवदति । अधिवसति । उपवसति । प्रवसति । निर्वहति । अनुवर्तते । परिवर्तते । निवर्तते । अवसीदति । अधितिष्ठति ।

४३.१०. कमपि विषयमवलम्ब्य स्वल्पं मनोवादं रचयत ।

४३.११ कर्मपदानि क्रियापदानि तद्धातवश्चान्विष्य लिखत ।

४३.१२ विद्यालये संपन्नं वार्षिकोत्सवं दशाधिकैर्वाक्यैर्वर्णयत ।

४३.१३ वाच्यपरिवर्तनं कुरुत ।

१. तेन सर्वमधीतं येन नैराश्यमवलम्बितम् ।

२. वृत्तिर्धात्रैव निर्मिता ।

३. लघुचेतसो जना अयं निजः परो वेति गणयन्ति ।

४. उदके शकटं न गच्छति ।

५. मया वहवश्छात्राः पाठ्यन्ते ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चतुश्चत्वारिंशत्तमः पाठः

४४.१ निम्नपद्यानि सस्वरं पठत ।

अमित्रं कुरुते मित्रं मित्रं द्वेष्टि हिनस्ति च ।
कर्म चारभते दुष्टं तमाहुर्मूढचेतसम् ॥१॥
एकं हन्यान्न वा हन्यादिषुर्मुक्तो धनुष्मता ।
बुद्धिर्बुद्धिमतोत्सृष्टा हन्यात् राज्यं सराजकम् ॥२॥
षण्णामात्मनि नित्यानामैश्वर्यं योऽधिगच्छति ।
न स पापैः कुतोऽनर्थैर्युज्यते विजितेन्द्रियः ॥३॥
शीलं प्रधानं पुरुषे तद् यस्येह प्रणश्यति ।
न तस्य जीवितेनार्थो न धनेन न बन्धुभिः ॥४॥
सुवर्णपुष्पां पृथ्वीं चिन्वन्ति पुरुषास्त्रयः ।
शूरश्च कृतविद्यश्च यश्च जानाति सेवितुम् ॥५॥
सुलभाः पुरुषा राजन् ! सततं प्रियवादिनः ।
अप्रियस्य तु पथ्यस्य वक्ता श्रोता च दुर्लभः ॥६॥
न विश्वसेदविश्वस्ते विश्वस्ते नातिविश्वसेत् ।
विश्वासाद् भयमुत्पन्नं मूलान्यपि निकृन्तति ॥७॥
धृतिः शमो दमः शौचं कारुण्यं वागनिष्ठुरा ।
मित्राणाञ्चानभिद्रोहः सप्तैताः समिधः स्मृता ॥८॥
अकीर्तिं विनयो हन्ति हन्त्यनर्थं पराक्रमः ।
हन्ति नित्यं क्षमा क्रोधमाचारो हन्त्यलक्षणम् ॥९॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

न स्वप्नेन जयेन्निद्रां न कामेन जयेत् स्त्रियः ।
नेन्धनेन जयेदग्निं न पानेन सुरां जयेत् ॥१०॥
नाग्निस्तृप्यति काष्ठानां नापगानां महोदधिः ।
नान्तकः सर्वभूतानां न पुंसां वामलोचना ॥११॥

४४.२ निम्नप्रश्नानामुत्तराणि लिखत ।

१. मूढचेतसः किं लक्षणम् ?
२. वुद्धिमतोत्सृष्टा वुद्धिः कं हन्ति ?
३. अनर्थैः को न युज्यते ?
४. कस्य जीवितेनार्थो नास्ति ?
५. सुवर्णपुष्पां पृथ्वीं के चिन्वन्ति ?
६. के पुरुषाः सुलभाः, कश्च दुर्लभः ?
७. केषु न विश्वसेत् ?
८. सप्तसमिधः काः सन्ति ?
९. अकीर्त्यनर्थक्रोधालक्षणानि कैर्हन्यन्ते ?
१०. निद्रां स्त्रियोऽग्निं सुराञ्च कैर्जेतुं न शक्यते ?
११. अग्निः समुद्रोऽन्तकः स्त्रियश्च कैर्न तृप्यन्ति ?

४४.३ निर्धारितपद्यानामन्वयं प्रदर्शयत ।

४४.४ पाठान्तर्गतपद्यानां व्याख्यां कुरुत ।

४४.५ सविग्रहं समासनामानि लिखत ।

अमित्रम् । मूढचेतसम् । इषुमुक्तः । सराजकम् । विजितेन्द्रियः । सुवर्णपुष्पाम् । कृतविद्यः । प्रियवादिनः । अप्रियः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अविश्वस्ते । अनभिद्रोहः । महोदधिः । सर्वभूतानाम् । वामलोचना ।

४४.६ सन्धिं विधाय सूत्राणि च लिखत ।

च + आरभते । हन्यात् + न । षट् + नाम् । यः + अधिगच्छति । कुतः + अनर्थैः । यस्य + इह । शूरः + च । मूलानि + अपि । जयेत् + अग्निम् । जयेत् + निद्राम् । अग्निः + तृप्यति । शमः+ दमः ।

४४.७ इमानि पद्यानि कस्य छन्दस उदाहरणानि ? सलक्षणं प्रकाशयत ।

४४.८ पाठान्तर्गतपद्यानां सरलार्थं लिखत ।

४४.९ वाक्येषु प्रयोगं कुरुत ।

द्वेष्टि । हिनस्ति । आरभते । अधिगच्छति । युज्यते । प्रणश्यति । निकृन्तति । हन्ति । तृप्यति ।

४४.१० प्रकृतिप्रत्ययविच्छेदं कुरुत ।

मुक्तः । उत्सृष्टः । सेवितुम् । प्रियः । शमः । कारुण्यम् । स्वप्नः । जीवितम् । धनुष्मान् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पञ्चचत्वारिंशत्तमः पाठः

४५.१ निम्नपद्यानि सस्वरं पठत ।

स्यादिन्द्रवज्रा यदि तौ जगौ गः ।

X X X

उपेन्द्रवज्रा जतजास्ततो गौ ॥

X X X

अनन्तरोदीरितलक्ष्मभाजौ

पादौ यदीयावुपजातयस्ताः ।

इत्थं किलान्यास्वपि मिश्रितासु

वदन्ति जातिष्विदमेव नाम ॥

X X X X X

सर्वौषधीनाममृतं प्रधानं

सर्वेषु सौख्येष्वशनं प्रधानम् ।

सर्वेन्द्रियाणां नयनं प्रधानं

सर्वेषु गात्रेषु शिरः प्रधानम् ॥१॥

गन्धः सुवर्णे फलमिक्षुदण्डे

नाकारि पुष्पं खलु चन्दनस्य ।

विद्वान् धनाढ्यश्च नृपश्चिरायु-

र्धातुः पुरा कोऽपि न बुद्धिदोऽभूत् ॥२॥

न निर्मितः केन न दृष्टपूर्वः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

न श्रूयते हेममयः कुरङ्गः ।
तथापि तृष्णा रघुनन्दनस्य
विनाशकाले विपरीतबुद्धिः ॥३॥
अर्थागमो नित्यमरोगिता च
प्रिया च भार्या प्रियवादिनी च ।
वश्यश्च पुत्रोऽर्थकरी च विद्या
षड् जीवलोकस्य सुखानि राजन् ॥४॥
यस्यास्ति वित्तं स नरः कुलीनः
स पण्डितः स श्रुतवान् गुणज्ञः ।
स एव वक्ता स च दर्शनीयः
सर्वे गुणाः काञ्चनमाश्रयन्ति ॥५॥
आरम्भगुर्वी क्षयिणी क्रमेण
लघ्वी पुरा वृद्धिमती च पश्चात् ।
दिनस्य पूर्वार्धपरार्धभिन्ना
छायेव मैत्री खलु सज्जनानाम् ॥६॥
रत्नैर्महार्हैस्तुतुषुर्न देवाः
न भेजिरे भीमविषेण भीतिम् ।
सुधां विना न प्रययुर्विरामं
न निश्चितार्थाद् विरमन्ति धीराः ॥७॥
असंभवं हेममृगस्य जन्म
तथापि रामो लुलुभे मृगाय ।
प्रायः समापन्नविपत्तिकाले

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

धियोऽपि पुसां मलिना भवन्ति ॥८॥

४५.२ निम्नप्रश्नानामुत्तराणि लिखत ।

१. औषधिषु, सौख्येषु, गात्रेषु, इन्द्रियेषु च केषामस्ति प्राधान्यम् ?

२. कस्मिन् विषये धातुर्वृद्धिदो न कोप्यभवत् ?

३. विनाशकाले बुद्धिः कीदृशी भवति, कश्चात्र दृष्टान्तः ?

४. खलानां सज्जनानाञ्च मैत्र्योः किमन्तरम् ?

५. धीराः कस्माद् न विरमन्ति ?

६. पुसां धियः कदा मलिना भवन्ति ?

४५.३ सर्वोषधीनां० गन्धंसुवर्णे० इति पद्यद्वयं कस्मिन् छन्दसि रचितमस्ति ? किञ्च तस्य लक्षणम् ? प्रकाशयत ।

४५.४ न निर्मितः० इति पद्यं कस्य छन्दस उदाहरणम् ? सलक्षणं निरूपयत ।

४५.५ अर्थागमादयः श्लोकाः कस्य छन्दस उदाहरणानि ? तत्र कयोश्च छन्दसो मिश्रणम् ? स्फुटं प्रतिपादयत ।

४५.६ उपजातिछन्दसो लक्षणं विलिख्योदाहरणे संगमयत ।

४५.७ इन्द्रवज्रोपेन्द्रवज्रयोर्लक्षणं सोदाहरणं स्फुटं प्रकाशयतं ।

४५.८ सविग्रहं समासनामानि लिखत ।

सर्वौषधीनाम् । सर्वेन्द्रियाणाम् । इक्षुदण्डे । धनाढ्यः वुद्धिदः । चिरायुः । विनाशकाले । विपरीतबुद्धिः । प्रियवादिनी । अर्थकरी । जीवलोकस्य । आरम्भगुर्वी । पूर्वार्धपरार्धभिन्ना । भीमविषेण ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

४५.९. प्रकृतिप्रत्ययविच्छेदं कुरुत ।

प्रधानम् । हीनः । वुद्धिदः । निर्मितः हेममयः । कुलीनः । श्रुतवान् । गुणज्ञः । वक्ता । दर्शनीयः । बुद्धिमती । भिन्नः ।

४५.१० निर्धारितपाठान्तर्गतपद्यानामन्वयं निर्दिश्य पर्यायशब्दान् लिखत ।

४५.११ सन्धिं विधाय सूत्राणि च लिखत ।

सौख्येषु + अशनम् । नृपः + चिरायुः । कः + अपि । वुद्धिदः + अभूत् । पुत्रः + अर्थकरी विद्या । यस्य + अस्ति । छाया + इव । निश्चितार्थात् + विरमन्ति ।

४५.१२ निम्नसूक्तीनामाशयं प्रकाशयत ।

१. विनाशकाले विपरीतवुद्धिः ।

२. न निश्चितार्थाद् विरमन्ति धीराः ।

३. सर्वे गुणाः काञ्चनमाश्रयन्ति ।

४५.१३ षष्ठ्यन्तपदान्यन्विष्य लिखत ।

४५.१४ वाक्येषु प्रयोगं कुरुत ।

आवर्तते । परिवर्तन्ते । निवर्तते । प्रवर्तते । अवसीदति । प्रसीदति । विषीदति । निषीदति । निःसरति । अनुसरति । प्रसरति । अधितिष्ठति । उत्तिष्ठति । प्रतिष्ठते । अपहरति । उद्धरति । अभ्यवहरति । प्रहरति । विहरति । संहरति । विनिश्चिनोति । संचिनोति । अवचिनोति । परिष्करोति । प्रादुर्भवति । परिभवति । प्रभवति ।

४५.१५ कामपि घटनामश्रित्य दशाधिकैर्वाक्यैः स्वल्पमनुच्छेदं रचयत ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

४५.१६ वाच्यपरिवर्तनं कुरुत ।

१. हेममयः कुरङ्गो न श्रूयते ।

२. सर्वे गुणाः काञ्चनमाश्रयन्ति ।

३. धीरा निश्चितादर्थाद् न विरमन्ति ।

४. देवाः सुधां विना विरामं न प्रययुः ।

५. धातुर्वुद्धिदो न कोप्यभवत् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

षट्चत्वारिंशत्तमः पाठः

४६.१ निम्नपद्यानि सस्वरं पठत ।

जतौ तु वंशस्थमुदीरितं जरौ
X X X X
वरं वनं व्याघ्रगजेन्द्रसेवितं
द्रुमालयं पक्वफलाम्वुभोजनम् ।
तृणानि शय्या रुचिरञ्च वल्कलं
न वन्धुमध्ये धनहीनजीवनम् ॥१॥
धनेन किं यो न ददाति नाश्नुते
वलेन किं यश्च रिपून्न वाधते ।
श्रुतेन किं यो न च धर्ममाचरेत्
किमात्मना यो न जितेन्द्रियो भवेत् ॥२॥
पिवन्ति नद्यः स्वयमेव नाम्भः
स्वयं न खादन्ति फलानि वृक्षाः ।
धाराधरो वर्षति नात्महेतोः
परोपकाराय सतां विभूतयः ॥३॥
सुजीर्णमन्नं सुविचक्षणः सुतः
सुशासिता स्त्री नृपतिः सुसेवितः ।
सुचिन्त्य चोक्तं सुविचार्य यत्कृतं
सुदीर्घकालेऽपि न याति विक्रियाम् ॥४॥
भवन्ति नम्रास्तरवः फलोद्गमैः
नवाम्बुभिर्दूरविलम्बिनो घनाः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अनुद्धताः सत्पुरुषाः समृद्धिभिः
स्वभाव एवैष परोपकारिणाम् ॥५॥

४६.२ अधोलिखितप्रश्नानामुत्तराणि लिखत ।

१. कीदृशं जीवनं न वरम् ?

२. परोपकारिणां स्वभावः कीदृशः ?

३. सतां विभूतयः कस्मै जायन्ते ?

४. कानि कार्याणि दीर्घकालेऽपि विक्रियां न यान्ति ?

५. के समृद्धिभिरनुद्धता भवन्ति ?

४६.३ इमानि पद्यानि कस्मिन् छन्दसि रचितानि सन्ति ? सलक्षणं प्रतिपादयत ।

४६.४ वंशस्थछन्दसो लक्षणं विलिख्योदाहरणे संगमयत ।

४६.५ निर्धारितपद्यानां सान्वयं पर्यायशब्दान् लिखत ।

४६.६ सविग्रहं समासनामनि लिखत ।

व्याघ्रगजेन्द्रसेवितम् । पक्वफलाम्बुभोजनम् । द्रुमालयम् । बन्धुमध्ये । धनहीनजीवनम् । दूरविलम्बिनः । अनुद्धताः । सत्पुरुषाः । धाराधरः । आत्महेतोः । जितेन्द्रियः । परोपकाराय । नवाम्बुभिः ।

४६.७ निर्धारितपद्यानां सरलार्थं लिखत ।

४६.८ प्रकृतिप्रत्ययविच्छेदं कुरुत ।

सेवितम् । पक्वम् । भोजनम् । जीवनम् । हीनः । परोपकारी । धरः । उद्धतः । विलम्बिनः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

४६.९ सन्धिं विधाय सूत्राणि लिखत ।

द्रुम + आलयम् । नम्राः + तरवः । स्वभावः + एष । न + अश्नुते । नव + अम्बु । एव + एष । यः + च । जित + इन्द्रियः । पर + उपकारः । धाराधरः + वर्षति । विलम्बिनः + घनाः ।

४६.१० वाक्येषु प्रयोगं कुरुत ।

तत्र । अत्र । उपरि । अधः । बहिः । अन्तः । अधुना । यदा । तदा । कदा । यतः ततः । कुतः । यथा । तथा । उच्चैः । नीचैः । मिथ्या । सत्यम् । इषत् । तूष्णीम् । किञ्चिद् । चिरम् । मुहुः । भूयोभूयः । क्रमशः । नोचेत् । प्रत्युत । झटिति । सम्यक् । स्पष्टम् । यद्यपि । तदनु । मन्दम् ।

४६.११ दशभिर्वाक्यैः परोपकारस्य महत्त्वं वर्णयत ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सप्तचत्वारिंशत्तमः पाठः

४७.१ निम्नपद्यानि सस्वरं पठत ।

ज्ञेयं वसन्ततिलकं तभजा जगौ गः
X X X X

जाड्यं धियो हरति सिञ्चति वाचि सत्यं
मानोन्नतिं दिशति पापमपाकरोति ।
चेतः प्रसादयति दिक्षु तनोति कीर्तिं
सत्संगतिः कथय किं न करोति पुंसाम् ॥१॥

प्रारम्यते न खलु विघ्नभयेन नीचैः
प्रारभ्य विघ्नविहता विरमन्ति मध्याः ।
विघ्नैः पुनः पुनरपि प्रतिहन्यमानाः
प्रारब्धमुत्तमजना न परित्यजन्ति ॥२॥

पापान्निवारयति योजयते हिताय
गूह्यं निगूहति गुणान् प्रकटीकरोति ।
आपद्गतञ्च न जहाति ददाति काले
सन्मित्रलक्षणमिदं प्रवदन्ति सन्तः ॥३॥

निन्दन्तु नीतिनिपुणाः यदि वा स्तुवन्तु
लक्ष्मीः समाविशतु गच्छतु वा यथेष्टम् ।
अद्यैव वा मरणमस्तु युगान्तरे वा
न्याय्यात् पथः प्रविचलन्ति पदं न धीराः ॥४॥

प्राक् पादयोः पतति खादति पृष्टमांसं
कर्णे कलं किमपि रौति शनैर्विचित्रम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

छिद्रं निरूप्य सहसा प्रविशत्यशङ्कः
सर्वं खलस्य चरितं मशकः करोति ॥५॥

४७.२ अधोलिखितप्रश्नानामुत्तराणि लिखत ।

१. सत्सङ्गतेः कार्याणि कानि ?
२. प्रारब्धं के न परित्यजन्ति ?
३. सन्मित्रस्य लक्षणानि कानि ?
४. धीराः किं न कुर्वन्ति ?
५. मशकस्य खलस्य च चरितानि कानि ?

४७.३ इमानि पद्यानि कस्य वृत्तस्योदाहरणानि, किञ्च तस्य लक्षणम् ? स्फुटं प्रकाशयत ।

४७.४ निर्धारितपाठान्तर्गतपदानां सान्वयं पर्यायशब्दान् लिखत ।

४७.५ वसन्ततिलकाया लक्षणं विलिख्योदाहरणे संगमयत ।

४७.६ सविग्रहं समासनामानि लिखत ।

विघ्नभयेन । विघ्नविहताः । उत्तमजनाः । आपद्गतम् । सन्मित्रलक्षणम् । नीतिनिपुणाः । यथेष्टम् । सत्सङ्गतिः ।

४७.७ सन्धिं विधाय सूत्राणि च लिखत ।

धियः + हरति । गतम् + च । निपुणाः + यदि । यथा + इष्टम् । प्रविशति + अशङ्कः । पापात् + निवारयति । पुनः + अपि ।

४७.८ निर्धारितपद्यानां सरलार्थं लिखत ।

४७.९ सत्सङ्गतेः महत्त्वं दशभिर्वाक्यैर्वर्णयत ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अष्टचत्वारिंशत्तमः पाठः

४८.१ निम्नपदानि सस्वरं पठत ।

ननमयययुतेयं मालिनी भोगिलोकैः ।

X X X X X

स हि गगनविहारी कल्मषध्वंसकारी
दशशतकरधारी ज्योतिषां मध्यचारी ।
विधुरपि विधियोगाद् ग्रस्यते राहुणासौ ।
लिखितमपि ललाटे प्रोज्झितुं कः समर्थः ॥१॥

नरपतिहितकर्ता द्वेष्यतां याति लोके
जनपदहितकर्ता त्यज्यते पार्थिवेन्द्रैः ।
इति महति विरोधे वर्तमाने समाने
नृपतिजनपदानां दुर्लभः कार्यकर्ता ॥२॥

उदयति यदि भानुः पश्चिमे दिग्विभागे
प्रचलति यदि मेरुः शीतलं याति वह्निः ।
विकसति यदि पद्मं पर्वताग्रे शीलायां
न भवति पुनरुक्तं भाषितं सज्जनानाम् ॥३॥

शशिनि खलु कलङ्कः कण्टकः पद्मनाले
युवतिकुचनिपातः पक्वता केशजाले ।
जलधिजलमपेयं पण्डिते निर्धनत्वम् ।
वयसि धनविवेको निर्विवेको विधाता ॥४॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

४८.२ निम्नप्रश्नानामुत्तराणि लिखत ।

१. किं प्रोज्झितुं न शक्यते ?

२. को द्वेष्यतां याति ?

३. कीदृशः कार्यकर्ता दुर्लभः ?

४. केषां भाषितं पुनरुक्तं न भवति ?

५. विधातुर्विवेकहीनत्वे कारणं किम् ?

४८.३ इमानि पद्यानि कस्मिन् छन्दसि रचितानि सन्ति ? किञ्च तस्य लक्षणम् ? प्रकाशयत ।

४८.४ सग्रिहं समसनामानि लिखत ।

गगनविहारी । कल्मषध्वंसकारी । दशशतकरधारी । मध्यचारी । विधियोगात् । नरपतिहितकर्ता । जनपदहितकर्ता । पार्थिवेन्द्रैः । नृपतिजनपदानाम् । युवतिकुचनिपातः । पद्मनाले । केशजाले । जलनिधिजलम् । अपेयम् । निर्विवेकः ।

४८.५ पाठान्तर्गतपद्यानां सान्वयं पर्यायशब्दान् लिखत ।

४८.६ सन्धिं विधाय सूत्राणि लिखत ।

राहुणा + असौ । योगात् + ग्रस्यते । पार्थिव + इन्द्रैः । पर्वत + अग्रे । निर्विवेकः + विधाता । त्वम् + च । समः + इह ।

४८.७ पाठान्तर्गतगपद्यानां सरलार्थं लिखत ।

४८.८ दशाधिकैर्वाक्यैश्चन्द्रस्य वैशिष्ट्यं वर्णयत ।

४८.९ मालिनीछन्दसो लक्षणं सोदाहरणं प्रदर्शयत ।

४८.१० वाच्यपरिवर्तनं कुरुत ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

१. जनपदहितकर्ता पार्थिवेन्द्रैस्त्यज्यते ।

२. राहुणा विधुरपि ग्रस्यते ।

३. ललाटे लिखितं प्रोज्झितुं न शक्यते ।

४. नरपतिहितकर्तारं जनाः द्विषन्ति ।

५. इमानि कार्याणि सम्यक् कुरुत ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एकोनपञ्चाशत्तमः पाठः

४९.१ निम्नपद्यानि सस्वरं पठत ।

मन्दाक्रान्ताम्बुधिरसनगैर्मो भनौ तौ गयुग्म् ।

X X X X X X

घृष्टं घृष्टं पुनरपि पुनश्चन्दनं चारुगन्धं
छिन्नं छिन्नं पुनरपि पुनः स्वादु चैवेक्षुदण्डम् ।
दग्धं दग्धं पुनरपि पुनः काञ्चनं कान्तवर्णं
प्राणान्तेऽपि प्रकृतिविकृतिर्जायते नोत्तमानाम् ॥१॥

मौनान्मूकः प्रवचनपटुर्वातुलो जल्पको वा
क्षान्त्या भीरुर्यदि न सहते प्रायशो नाभिजातः ।
धृष्टः पार्श्वे वसति च सदा दूरतश्चाप्रगल्भः
सेवाधर्मः परमगहनो योगिनामप्यगम्यः ॥२॥

धूमज्योतिसलिलमरुतां सन्निपातः क्व मेघः
सन्देशार्थाः क्व पटुकरणैः प्राणिभिः प्रापणीयाः ।
इत्यौत्सुक्यादपरिगणयन् गुह्यकस्तं ययाचे
कामार्ता हि प्रकृतिकृपणाश्चेतनाचेतनेषु ॥३॥

४९.२ निम्नप्रश्नानामुत्तराणि लिखत ।

१. प्रकृतिविकृतिः केषां न जायते, कश्चात्र दृष्टान्तः ?
२. सेवाधर्मः कीदृशः ?
३. मेघः केषां सन्निपातो विद्यते ?

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

४. के प्रकृतिकृपणाः भवन्ति ?

५. कामार्तानां का दशा जायते ?

४९.३ इमानि पद्यानि कस्य वृत्तस्योदाहरणानि ? किञ्च तस्य लक्षणम् ? प्रकाशयत ।

४९४ सान्वयं पर्यायशब्दान् लिखत ।

४९.५ सविग्रहं समासनामानि लिखत ।

चारुगन्धम् । इक्षुदण्डम् । कान्तवर्णम् । प्राणान्ते । प्रकृतिविकृतिः । प्रवचनपटुः । अप्रगल्भः । सेवाधर्मः । परमगहनः । अगम्यः । धूमज्योतिसलिलमरुताम् । पटुकरणैः । सन्देशार्थाः । कामार्ताः । चेतनाचेतनेषु । प्रकृतिकृपणाः ।

४९.६ पाठान्तर्गतपद्यानां सरलार्थं लिखत ।

४९.७ मन्दाक्रान्ताछन्दसो लक्षणं विलिख्योदाहरणे संगमयत ।

४९.८ सन्धिं विधाय सूत्राणि च लिखत ।

च + एव । प्राणान्ते + अपि । न + उत्तमाः । अपि + अगम्यः । प्रायशः + नाभिजातः । काम + आर्ताः । इति + औत्सुक्यम् ।

४९.९ कमपि विषयमवलम्ब्य दशाधिकैर्वाक्यैरेकमनुच्छेदं रचयत ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पञ्चाशत्तमः पाठः

५०.१ निम्नपद्यं सस्वरं पठत ।

रसैरुद्रैश्छिन्ना यमनसभला गः शिखरिणी ।
x x x x x x x

यदा किञ्चिद्ज्ञोऽहं द्विप इव मदान्धः समभवं
तदा सर्वज्ञोऽस्मीत्यभवदवलिप्तं मम मनः ।
यदा किञ्चित् किञ्चिद् बुधजनसकाशादवगतं
तदा मूर्खोऽस्मीति ज्वर इव मदो मे व्यपगतः ॥

५०.२ निम्नप्रश्नानामुत्तराणि लिखत ।

१. को मदान्धः सञ्जातः ?
२. मदान्धत्वस्य कारणं किम् ?
३. मनः केनावलिप्तमभवत् ?
४. बुधजनात् किमवगतम् ?
५. मदः क इव व्यपगतः ?

५०.३ अस्मिन् पद्ये कस्य छन्दसः प्रयोगो विद्यते ? किञ्च तस्य लक्षणम् ?

५०.४ निर्धारितपद्यस्यान्वयं विलिख्य पर्यायशब्दान् पदर्शयत ।

५०.५ सविग्रहं समासनामानि लिखत ।
किञ्चिद्ज्ञः । मदान्धः । सर्वज्ञः । बुधजनसकाशात् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

५०.६ सन्धिं विधाय सूत्राणि लिखत ।

ज्ञः + अहम् । द्विपः + इव । अभवत् + अवलिप्तम् । मदः + मे । सकाशात् + अवगतम् ।

५०.७ निर्धारितपद्यस्य सरलार्थं लिखत ।

५०.८ शिखरिणीवृत्तस्य लक्षणं विलिख्योदाहरणे संगमयत ।

५०.९ शिखरिणीवृत्तस्य पद्यत्रयमन्विष्य लिखत ।

५०.१० दशाधिकैर्वाक्यैः शरदो वैशिष्ट्यं वर्णयत ।

○

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एकपञ्चाशत्तमः पाठः

५१.१ निम्नपद्यानि सस्वर पठत ।

सूर्याश्वैर्मसजस्तताः सगुरवः शार्दूलविक्रीडितम् ।
X X X X X x x

शक्यो वारायितुं जलेन हुतभुक् छत्रेण सूर्यातपो
नागेन्द्रो निशिताङ्कुशेन समदो दण्डेन गोगर्दभौ ।
व्याधिर्भेषजसंग्रहैश्च विविधैर्मन्त्रप्रयोगैर्विषं
सर्वस्यौषधमस्ति शास्त्रविहितं मूर्खस्य नास्त्यौषधम् ॥१॥

विद्या नाम नरस्य रूपमधिकं प्रच्छन्नगुप्तं धनं
विद्या भोगकरी यशःसुखकरी विद्या गुरूणां गुरुः ।
विद्या वन्धुजनो विदेशगमने विद्या परा देवता
विद्या राजसु पूज्यते न तु धनं विद्याविहीनः पशुः ॥२॥

क्षान्तिश्चेत् कवचेन किं किमरिभिः क्रोधोऽस्ति चेद् देहिनां
ज्ञातिश्चेदनलेन किं यदि सुहृद् दिव्यौषधैः किं फलम् ।
कि सर्पैर्यदि दुर्जनाः किमु धनैर्विद्याऽनवद्या यदि
व्रीडा चेत् किमु भूषणैः सुकविता यद्यस्ति राज्येन किम् ॥३॥

५१.२ निम्नप्रश्नानामुत्तराणि लिखत ।

१. हुतभुक् केन वारयितुं शक्यते ?
२. सूर्यातपः नागेन्द्रश्च काभ्यां वार्येते ?
३. कस्यौपधं शास्त्रेपु वर्णितं नास्ति ?

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

४. विद्या कीदृशी वर्तते ?

५. कीदृशो नरः पशुतुल्यो भवति ?

५१.३ इमानि पद्यानि कस्मिन् छन्दसि रचितानि सन्ति ? किञ्च तस्य लक्षणम् ? कुत्र कुत्र च विश्रामः ? स्फुटं प्रकाशयत ।

५१.४ विग्रहान् प्रदर्श्य समासनामानि लिखत ।

सूर्यातपः । नागेन्द्रः । निशिताङ्कुशेन । गोगर्दभौ । समदः भेषजसंग्रहैः । मन्त्रप्रयोगैः । शास्त्रविहितं । प्रच्छन्नगुप्तम् । भोगकरी । यशःसुखकरी । बन्धुजनः । विद्याविहीनः ।

५१.५ निर्धारितपद्यानामन्वयं प्रदर्श्य पर्यायशब्दान् लिखत ।

५१.६ वाक्यविश्लेषणं कुरुत ।

विद्या नरस्य रूपं प्रच्छन्नगुप्तं धनं गुरूणामपि गुरुः विदेशगमने वन्धुः यशोदा सुखदा राजपूज्या च वर्तते ।

५१.७ उक्तपद्यानां सरलार्थं लिखत ।

५१.८ शार्दूलविक्रीडितछन्दसो लक्षणं सोदाहरणं प्रकाशयत ।

○

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

द्विपञ्चाशत्तमः पाठः

५२.१ निम्नपद्यं पठत ।

म्रभ्नैर्यानां त्रयेण त्रिमुनियतियुता स्रग्धरा कीर्तितेयम् ।

X X X X X X X

सन्मार्गे तावदास्ते प्रभवति पुरुपस्तावदेवेन्द्रियाणां
लज्जां तावद् विधत्ते विनयमपि समालम्वते तावदेव ।
भ्रूचापाकृष्टमुक्ताः श्रवणथगता नीलपक्ष्माण एते
यावल्लीलावतीनां न हृदि धृतिमुषो दृष्टिवाणाः पतन्ति

५२.२ निम्नप्रश्नानामुत्तराणि लिखत ।

१. पुरुषः सन्मार्गे कियत्समयमास्ते ?
२. लीलावतीनां दृष्टिवाणेषु पतत्सु पुरुषस्य का दशा जायते ?
३. इदं पद्यं कस्मिन् छन्दसि रचितं विद्यते ? किञ्च तस्य लक्षणम् ?
४. कुत्र कुत्र चात्र विश्रामः ?

५२.३ उक्तपद्यान्तर्गतपदानामन्वयं प्रदर्श्य पर्यायशब्दान् लिखत ।

५२.४ उक्तपद्यस्य सरलार्थं लिखत ।

५२.५ सविग्रहं समासनामानि लिखत ।

भ्रूचापाकृष्टमुक्ताः । श्रवणपथगताः । नीलपक्ष्माणः । लीलावतीनाम् । धृतिमुषः । दृष्टिवाणाः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

५२.६ कमप्येकं विषयमवलम्ब्य स्वल्पमनुच्छेदं रचयत ।

५२.७ पञ्चदशाधिकैर्वाक्यैर्हेमन्तस्य शिशिरस्य वा शोभां वर्णयत ।

५२.८ वाक्येषु प्रयोगं कुरुत ।

आस्ते । समालम्बते । विद्यते । प्रभवति । पतन्ति । हृदि । यावत् । तावद् । मुक्ताः। कीर्तिता ।

५२.९ प्रकृतिप्रत्ययविच्छेदं कुरुत ।

कीर्तिता । मुक्ताः । श्रवणम् । आकृष्टाः । लीलावती । धृतिः । दृष्टिः । विनयः ।

५२.१० स्रग्धराछन्दसि रचितं पद्यत्रयमन्विष्य लिखित ।

समाप्तोऽयं ग्रन्थः

Acc. 22494/22414

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu